

# મારો સ્વાધ્યાય

✻ સંપાદક ✻

પૂજ્ય મુનિ શ્રી દિવ્યરત્ન વિજયજી મહારાજ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# મારો સ્વાધ્યાય

• સંશોધક •

પરમપૂજ્ય આચાર્ય મુનિચંદ્રસૂરીશ્વરજી મ.સા.

પરમપૂજ્ય આચાર્ય જયસુંદરસૂરીશ્વરજી મ.સા.

• આશીર્વાદ •

પૂ.પં. જયતિલક વિ. મ.સા.

• સંપાદક •

પરમપૂજ્ય અધ્યાત્મયોગી આચાર્યદેવ શ્રીમદ્ વિજય

**કલાપૂર્ણસૂરીશ્વરજી મહારાજાના**

પટ્ટધર શિષ્ય

પરમપૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય

**કલાપ્રભસૂરીશ્વરજી મહારાજાના**

શિષ્યરત્ન

**પૂજ્ય મુનિશ્રી દિવ્યરત્ન વિજય**

• પ્રકાશક •

**શ્રી શ્રમણ સેવા પરિવાર**

**C/O ૩૦૬, બી-વીંગ, કૃપાપ્રસાદ બીલ્ડીંગ,**

**દાઉદ બાગ લેન, અંધેરી-વેસ્ટ, મુંબઈ.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुद्रिताधार :- विविधस्तोत्र संग्रह, मुद्रा विज्ञान,
विधि- प्रपामार्ग आदि ग्रंथ।
मुद्रा :- पूज्य पं. इन्द्रजित् विजयजी महाराज।

संशोधित + प्रक्षिप्त :-द्वितीयावृत्ति - नकल 1000

सहयोग :- विविध पू. साधु-साध्वीजी महाराज ।

प्राप्तिस्थान :- पं. नानालालभाई घेलाभाई,
श्री दादर आराधना भवन,
अेस. के. बोलेरोड, दादर (वेस्ट), मुंबई

मूल्य : रु. ५०/-

-: मुद्रक :-
वर्धमान पुस्तक प्रकाशन
शाहीबाग, अहमदाबाद - 380004 मो : 9227527244

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# આર્થિક સહયોગ

પૂજ્ય મુનિરાજશ્રી દિવ્યરત્ન વિજયજી મ.સા.
તથા પૂ. મુનિરાજશ્રી હર્ષબોધિ વિજયજી મ.સા. ના
સં. ૨૦૫૯ના ભવ્ય ચાતુર્માસની સ્મૃતિમાં
શ્રી કૃષ્ણનગર જૈન શ્વે. મૂ. પૂ. સંઘ, કૃષ્ણનગર,
સૈજપુર બોઘા, અમદાવાદ

તથા

પૂજ્યપાદ આચાર્યદેવશ્રી વરબોધિસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન પૂજ્ય મુનિરાજશ્રી હર્ષબોધિવિજય મ.સા.ની
પ્રેરણાથી

**श्री सुविधिनाथ जैन श्वे. मू. पू. संघ**
**आई. टी. आई रोड सातारा जि. पुणे ( महाराष्ट्र )**

ઉપરોક્ત બન્ને શ્રી સંઘોએ જ્ઞાનખાતામાંથી
પુસ્તક પ્રકાશનનો લાભ લીધો છે.
માટે ગૃહસ્થોએ ધ્યાન રાખવું.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमणिका


| पृष्ठ | कृति | कर्ता |
|---|---|---|
| १ | श्री नमस्कार महामंत्र | शाश्वत |
| २ | श्री वज्रपंजर स्तोत्र | अज्ञात पूर्वधरस्थविर |
| ३ | श्री जिनपंजर स्तोत्र | कमलप्रभसूरि |
| ६ | श्री उवसग्गहरं स्तोत्र | अज्ञात जैनश्रमण |
| १० | श्री चिंतामणिपार्श्वनाथ स्तोत्र | अज्ञात जैनाचार्य |
| १३ | श्री मंत्राधिराज पार्श्वनाथ स्तोत्र | अन्य अज्ञात जैन |
| १७ | श्री जीरावला पार्श्वनाथ स्तोत्र | मेरुतुंगसूरि |
| १९ | महामंत्रगर्भित श्री कलिकुंड पार्श्वनाथ स्तोत्र | अज्ञात जैनश्रमण |
| २० | श्री स्तंभन पार्श्वनाथ स्तुति | |
| २१ | श्री शक्रस्तव | सिद्धसेनदिवाकर |
| २७ | प्रथम पावपडिग्घाय गुणबीजाहाणसुत्त | चिरंतनाचार्य |
| ३० | मुनिनाम् अप्रमादयन्त्रम्- [ उपमिति ] | सिद्धर्षिगणि |
| ३१ | श्री शत्रुञ्जय लघुकल्प | अज्ञात जैनश्रमण |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| ३४ | श्री वर्धमान विद्या स्तव | |
| ३५ | श्री धर्मचक्र विद्या | |
| ३५ | श्री परमेष्ठी मंत्र | |
| ३६ | श्री वर्धमान विद्या | |
| ३६ | श्री महावीरस्तव | आचार्य अभयेदवसूरि |
| ३९ | गणि-पंन्यास पद धारक वर्धमान विद्या | |
| ४० | बृहद् वर्धमान विद्या | |
| ४२ | श्री ॐकार विद्या स्तवन | |
| ४४ | श्री ह्रींकार विद्या स्तवन | |
| ४६ | श्री नमस्कारमंत्राधिराजस्तोत्र | |
| ४७ | श्री लब्धिपदगर्भितमहर्षिस्तोत्र | |
| ४८ | लब्धिपद फल प्रकाशक कल्प | |
| ५१ | श्री सिद्धचक्रस्तोत्र | |
| ५३ | श्री गौतमाष्टक | |
| ५५ | सिरि गोयम थवो | आचार्य मुनिसुंदरसूरि |
| ५६ | श्री गौतमस्वामी छन्द | विजयसेनसूरि |
| ५८ | श्री अनुभूतसिद्धसारस्वतस्तोत्र | आचार्य बप्पभट्टसूरि |
| ६० | श्री सरस्वती नाम स्तोत्र | अज्ञात |
| ६३ | श्री सूरिमन्त्र स्तोत्र | आचार्य मुनिसुंदरसूरि |
| ६४ | श्री सरस्वती - अष्टक | आचार्य मुनिसुंदरसूरि |
| ६५ | श्री त्रिभुवनस्वामिनी देवी स्तोत्र | आचार्य मुनिसुंदरसूरि |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| ६६ | श्री श्रीदेवी स्तोत्र | आचार्य मुनिसुंदरसूरि |
| ६७ | श्री यक्षराजगणिपिटक स्तोत्र | आचार्य मुनिसुंदरसूरि |
| ६८ | श्री पञ्चमपीठाधिष्ठायक स्तोत्र | आचार्य मुनिसुंदरसूरि |
| ६९ | श्री चक्रेश्वरीदेवी स्तोत्र | आचार्य मुनिसुंदरसूरि |
| ७० | श्री चक्रेश्वरी स्तोत्र | |
| ७२ | श्री पद्मावती स्तोत्र | श्रीधराचार्य |
| ७५ | श्री पद्मावती स्तोत्र | |
| ७६ | श्री चन्द्रप्रभ विद्यास्तव | |
| ७७ | श्री ज्वालामालिनीदेवीमालामंत्र | |
| ८३ | श्री ज्वालामालिनी स्तोत्र | |
| ८६ | श्री शांतिधारापाठ | |
| ९० | श्री शान्तिघोषणा | अन्य अज्ञात |
| ९१ | श्री ऋषिमण्डल स्तोत्र | |
| १०० | श्री गुरुस्तुति | |
| १०१ | श्री गुरुपादुका स्तोत्र | अज्ञात |
| १०२ | भैरव क्षेत्रपाल स्तोत्र | |
| १०४ | श्री क्षेत्रपाल अर्चना | |
| १०५ | अथाष्टक | |
| १०८ | जयमाला | |
| ११० | कल्पसूत्रांश | आचार्य भद्रबाहुसूरि |
| १११ | श्री शान्तिनाथ स्तोत्र | |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

११२ श्री उपदेश श्लोक

११३ श्री वर्धमाविद्या जाप विधि — અમરહંસગણિ

१२३ વાસક્ષેપ મંત્રવાની વિધિ

१२४ નવકારવાળી મંત્રવાની વિધિ

१२५ બીજાક્ષરોનો સંક્ષિપ્ત અર્થ

१२७ श्रीपञ्चषष्टि स्तोत्र

१२८ पञ्चषष्टि यन्त्र स्थापना

१२८ ધજા ઉપર લખવાનો યંત્ર

१२८ દંડ-પાટલી ઉપર લખવાનો યંત્ર

१२९ ૧૭૦ યંત્ર

१२९ ઘંટ ઉપર લખવાનો યંત્ર

१२९ સિદ્ધ ભગવંત — પૂ. આ. કલાપૂર્ણસૂરિ

१३० નવગ્રહ જાપ

१३१ શ્રી નવગ્રહ શાંતિ જાપ મંત્ર

१३२ ચાતુર્માસ પ્રવેશ વગેરે પ્રસંગ પર નગરપ્રવેશની વિધિ

१३४ મકાન પ્રવેશ વિધિ

१३५ રક્ષા પોટલી મંત્રવાની વિધિ

१३५ જાજમ પાથરવાની વિધિ

१३८ દેરાસરની વર્ષગાંઠે ધજા ચડાવવાનો વિધિ

१३९ संसारचक्रसूत्र ( જિનાગમાન્તર્ગત ગાથાઓ)

१४० कर्मसूत्र




Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४१ राग-परिहारसूत्र
१४३ धर्मसूत्र
१४५ संयमसूत्र
१४७ अप्रमादसूत्र
१४८ आत्म-मोक्षसूत्र
१४९ रत्नत्रयसूत्र
१५१ श्रमणधर्मसूत्र
१५२ समिति-गुप्तिसूत्र
१५३ तपसूत्र
१५७ ध्यानसूत्र
१५९ अनुप्रेक्षासूत्र
१६० संलेखनासूत्र
१६२ निर्वाणसूत्र
૧૬૩ મંત્ર પરંપરા
૧૬૪ મંત્રના ત્રણ લિંગ
૧૬૫ મંત્ર શાસ્ત્રોની નિધિ
૧૬૬ જાપના ૩ પ્રકાર
૧૬૬ મંત્ર-અનુષ્ઠાન આરંભ વખતના લગ્ન ફળ
૧૬૭ મંત્ર-વિદ્યા અનુષ્ઠાન આરંભ નક્ષત્રફળ
૧૬૮ આસન પ્રમાણે ફળ :
૧૬૮ વિદ્યા - મંત્ર - ગ્રહણ કર્યા પછી સિદ્ધિ
૧૬૯ મંત્ર ફળ ક્યારે
૧૬૯ મંત્રના સંપ્રદાય અભિપ્રેત મંત્ર પ્રકારાદિ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री नवकार महामंत्र

नमो अरिहंताणं

नमो सिद्धाणं

नमो आयरियाणं

नमो उवज्झायाणं

नमो लोए सव्व-साहूणं

एसो पंच-नमुक्कारो

सव्व-पाव-प्पणासणो

मंगलाणं च सव्वेसिं

पढमं हवइ मंगलं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री वज्रपंजर स्तोत्र ॥

ॐ परमेष्ठिनमस्कारं, सारं नवपदात्मकं ।
आत्मरक्षाकरं वज्रपञ्जराभं स्मराम्यहम् ॥१॥

ॐ नमो अरिहंताणं, शिरस्कं शिरसि स्थितम् ।
ॐ नमो सव्वसिद्धाणं, मुखे मुखपटं वरम् ॥२॥

ॐ नमो आयरियाणं, अङ्गरक्षाऽतिशायिनी ।
ॐ नमो उवज्झायाणं, आयुधं हस्तयोर्दृढम् ॥३॥

ॐ नमो लोए सव्वसाहूणं, मोचके पादयोः शुभे ।
एसो पंचनमुक्कारो, शिला वज्रमयी तले ॥४॥

सव्वपावप्पणासणो, वप्रो वज्रमयो बहिः ।
मंगलाणं च सव्वेसिं खादिराङ्गारखातिका ॥५॥

स्वाहान्तं च पदं ज्ञेयं, पढमं हवइ मंगलं ।
वप्रोपरि वज्रमयं, पिधानं देहरक्षणे ॥६॥

महाप्रभावा रक्षेयं, क्षुद्रोपद्रवनाशिनी ।
परमेष्ठिपदोद्भूता, कथिता पूर्वसूरिभिः ॥७॥

यश्चैवं कुरुते रक्षां, परमेष्ठिपदैः सदा ।
तस्य न स्याद् भयं व्याधिराधिश्चाऽपि कदाचन ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री जिनपंजर स्तोत्र

ॐ ह्रीँ श्रीँ अर्हं अर्हद्भ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हं सिद्धेभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हं आचार्येभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हं उपाध्यायेभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हं श्रीगौतमस्वामिप्रमुखसर्वसाधुभ्यो नमो नमः ॥१॥

एष पंचनमस्कारः सर्वपापक्षयंकरः ।
मंगलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥२॥

ॐ ह्रीँ श्रीँ जये विजये, अर्हं परमात्मने नमः ।
कमलप्रभसूरीन्द्रो, भाषते जिनपंजरम् ॥३॥

एकभुक्तोपवासेन, त्रिकालं यः पठेदिदम् ।
मनोऽभिलषितं सर्वं फलं स लभते ध्रुवम् ॥४॥

भूशय्या ब्रह्मचर्येण, क्रोधलोभविवर्जितः ।
देवताग्रे पवित्रात्मा, षण्मासैर्लभते फलम् ॥५॥

अर्हन्तं स्थापयेन्मूर्ध्नि, सिद्धं चक्षुर्ललाटके ।
आचार्यं श्रोत्रयोर्मध्ये, उपाध्यायं तु घ्राणके ॥६॥

साधुवृन्दं मुखस्याग्रे, मनःशुद्धिं विधाय च ।
सूर्यचन्द्रनिरोधेन, सुधीः सर्वार्थसिद्धये ॥७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्षिणे मदनद्वेषी, वामपार्श्वे स्थितो जिनः ।
अंगसंधिषु सर्वज्ञः, परमेष्ठी शिवंकरः ॥८॥

पूर्वाशां च जिनो रक्षेदाग्नेयीं विजितेन्द्रियः ।
दक्षिणाशां परब्रह्म, नैऋतिं च त्रिकालवित् ॥९॥

पश्चिमाशां जगन्नाथो, वायवीं परमेश्वरः ।
उत्तरां तीर्थकृत्सर्वामीशानीं च निरंजनः ॥१०॥

पातालं भगवानर्हन्नाकाशं पुरुषोत्तमः ।
रोहिणीप्रमुखादेव्यो, रक्षन्तु सकलं कुलम् ॥११॥

ऋषभो मस्तकं रक्षेदजितोऽपि विलोचने ।
सम्भवः कर्णयुगलं, नासिकां चाभिनंदनः ॥१२॥

ओष्ठौ श्रीसुमती रक्षेद् दन्तान्पद्मप्रभो विभुः ।
जिह्वां सुपार्श्वदेवोऽयं, तालुश्चन्द्रप्रभाभिधः ॥१३॥

कण्ठं श्रीसुविधी रक्षेद्, हृदयं श्रीसुशीतलः ।
श्रेयांसो बाहुयुगलं, वासुपूज्यः करद्वयम् ॥१४॥

अंगुलीर्विमलो रक्षेदनन्तोऽसौ नखानपि ।
श्रीधर्मोप्युदरास्थिनि, श्रीशान्तिर्नाभिमण्डलम् ॥१५॥

श्रीकुंथुर्गुह्यकं रक्षेदरो लोमकटितटम् ।
मल्लिरुरुपृष्ठवंशं, जंघे च मुनिसुव्रतः ॥१६॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादांगुलिर्नमि रक्षेच्छ्रीनेमिश्चरणद्वयम् ।
श्रीपार्श्वनाथः सर्वांगं, वर्धमानश्चिदात्मकम् ॥१७॥

पृथिवी-जल-तेजस्क-वाय्वाकाशमयं जगत् ।
रक्षेदशेषपापेभ्यो, वीतरागो निरंजनः ॥१८॥

राजद्वारे श्मशाने च, संग्रामे शत्रुसंकटे ।
व्याघ्र-चौराग्नि-सर्पादि, भूतः-प्रेत-भयाऽऽश्रिते ॥१९॥

अकाले मरणे प्राप्ते, दारिद्यापत्समाश्रिते ।
अपुत्रत्वे महादुःखे, मूर्खत्वे रोगपीडिते ॥२०॥

डाकिनी-शाकिनीग्रस्ते, महाग्रहगणार्दिते ।
नद्युतारेऽध्ववैषम्ये, व्यसने चापदि स्मरेत् ॥२१॥

प्रातरेव समुत्थाय, यः स्मरेज्जिनपंजरम् ।
तस्य किञ्चिद् भयं नास्ति, लभते सुखसम्पदः ॥२२॥

जिनपंजरनामेदं, यः स्मरेदनुवासरम् ।
कमलप्रभराजेन्द्रश्रियं स लभते नरः ॥२३॥

प्रातः समुत्थाय पठेत्कृतज्ञो, यः स्तोत्रमेतज्जिनपञ्जराख्यम् ।
आसादयेत्स कमलप्रभाख्याम्, लक्ष्मीं मनोवाञ्छितपूरणाय ॥२४॥

श्रीरुद्रपल्लीयवरेण्यगच्छे, देवप्रभाचार्यपदाब्जहंसः ।
वादीन्द्रचूडामणिरेष जैनो, जीयाद् गुरुश्रीकमलप्रभाख्यः ॥२५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री उवसग्गहरं स्तोत्र ॥

उवसग्गहरं पासं, पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं, मंगलकल्लाण-आवासं ॥१॥

विसहरफुलिंगमंतं, कंठे धारेइ जो सया मणुओ ।
तस्स गहरोगमारी, दुट्ठजरा जंति उवसामं ॥२॥

चिट्ठउ दूरे मंतो, तुज्ज पणामो वि बहुफलो होइ ।
नरतिरिएसु वि जीवा, पावंति न दुक्खदोगच्चं ॥३॥

ॐ अमरतरुकामधेणु, चिंतामणि-काम-कुंभमाइया ।
सिरिपासनाह सेवा-गहाण सव्वेवि दासत्तं ॥४॥

ॐ ह्रीं श्रीं ऐं तुहदंसणेण सामिय,
पणासेइ रोगसोगदु:क्खदोहग्गं ।
कप्पतरुमिव जायइ,
ॐ तुह दंसणेण सव्वफलहेऊ स्वाहा ॥५॥

ॐ ह्रीं नमिउण विग्घनासाय, मायाबीएण धरणनागिंदं ।
सिरिकामराजकलियं, पास जिणिंदं नमंसामि ॥६॥

ॐ ह्रीं श्रीं सिरिपास विसहर, विज्जामंतेण झाणं झाएज्जा ।
धरण-पउमावई देवी, ॐ ह्रीं क्ष्म्ल्व्यूं स्वाहा ॥७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ जयउ धरणिंद-पउमावई य नागिणी विज्जा ।
विमलझाणसहिओ, ॐ ह्रीँ क्ष्म्ल्व्यूँ स्वाहा ॥८॥

ॐ थुणामि पासनाहं, ॐ ह्रीँ पणमामि परमभत्तिए ।
अट्ठक्खरधरणेंदो-पउमावई पयडिया कित्ती ॥९॥

जस्स पयकमलमज्झे, सया वसेइ पउमावई य धरणिंदो ।
तस्स नामेण सयलं, विसहरविसं नासेइ ॥१०॥

तुह सम्मत्ते लद्धे, चिंतामणिकप्पपायवब्भहिए ।
पावंति अविग्घेणं, जीवा अयरामरं ठाणं ॥११॥

ॐ नट्ठट्ठ-मयट्ठाणे, पणट्ठकम्मट्ठ नट्ठसंसारे ।
परमट्ठनिट्ठिअट्ठे, अट्ठगुणाधिसरं वन्दे ह्रीँ स्वाहा ॥१२॥

ॐ गरुडो वनितापुत्रो, नागलक्ष्मीं महाबलः ।
तेण मुच्चंति मुसा, तेण मुच्चंति पन्नगाः ॥१३॥

स तुह नाम सुद्धमंतं, सम्मं जो जवेइ सुद्धभावेण ।
सो अयरामरं ठाणं, पावइ न य दोग्गइं दुक्खं वा ॥१४॥

ॐ पण्डु-भगंदर दाहं, कासं सासं च सूलमाइणि ।
पासपहुपभावेण, नासंति सयलरोगाइं ह्रीँ स्वाहा ॥१५॥

ॐ विसहर-दावानलं-साइणि-वेयाल-मारि-आयंका ।
सिरिनीलकंठपासस्स, समरणमित्तेण नासंति ॥१६॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नासं गोपीडां कूरग्गह, तुह दंसणं भयं काये ।
आवि न हुँतिए तहवि, तिसंज्झं जं गुणिज्जासु ॥१७॥

पीडं जंतं भगंदरं खासं, सासं शूल तह निव्वाहं ।
सिरिसामलपासमहंत, नाम पऊरपऊलेण ॥१८॥

ॐ ह्रीँ श्रीँ पासधरणसंजुत्तं,
विसहरविज्जं जवेइ सुद्धमणेणं, पावइ
इच्छियं सुहं ॐ ह्रीँ श्रीँ क्ष्म्ल्व्यूँ स्वाहा ॥१९॥

ॐ रोग-जल-जलण विसहर, चोरारिमइंदगयरणभयाइं ।
पासजिणनामसंकित्तणेणं, पसमंति सव्वाइं ह्रीँ स्वाहा ॥२०॥

ॐ जयउ धरणिंदनमंसिय, पउमावईपमुहनिसेवियपाया ।
ॐ क्लीँ ह्रीँ महासिद्धिं, करेइ पास जगनाहो ॥२१॥

ॐ ह्रीँ श्रीँ तं नमह पासनाहं,
ॐ ह्रीँ श्रीँ धरणिंदनमंसियं दुहविणासं,
ॐ ह्रीँ श्रीँ जस्स पभावेण सया,
ॐ ह्रीँ श्रीँ नासंति उवद्दवा बहवे ॥२२॥

ॐ ह्रीँ श्रीँ पइ समरंताण मणे,
ॐ ह्रीँ श्रीँ न होइ वाही न तं महादुक्खं ।
ॐ ह्रीँ श्रीँ नामं पि हि मन्तसमं,
ॐ ह्रीँ श्रीँ पयडं नत्थीत्थ संदेहो ॥२३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ ह्रीँ श्रीँ जल जलण-भये, तह सप्प-सिंह,
ॐ ह्रीँ श्रीँ चोरारि संभवे खिप्पं ।
ॐ ह्रीँ श्रीँ जो समरेइ पासपहुं,
ॐ श्रीँ क्लीँ पुहवि कायावि किं तस्स ॥२४॥

ॐ श्रीँ क्लीँ ह्रीँ इहलोगट्ठी परलोगट्ठी,
ॐ ह्रीँ श्रीँ जो समरेइ पासनाहं ।
ॐ ह्राँ ह्रीँ ह्रूँ ह्रः ग्राँ ग्रीँ ग्रूँ ग्रः तं तह सिज्झई खिप्पं ॥२५॥

इह नाह समरह भगवंत, ॐ ह्रीँ श्रीँ क्लीँ ग्राँ ग्रीँ ।
ग्रूँ ग्रः क्लीँ क्लीँ श्री कलिकुण्डस्वामिने नमः ॥२६॥

इअ संथुओ महायस, भत्तिब्भरनिब्भरेण हियएण,
ता देव दिज्ज बोहिं, भवे भवे पास जिणचंद ॥२७॥

ભગવાન મહાવીર સ્વામી આહાર-પાણીની માત્રાને જાણવા છતાં. રસોમાં આસક્ત ન હતા. કોઈ ચોક્કસ દ્રવ્યની પ્રતિજ્ઞા પણ કરતા ન હતા. આંખમાં રજકણ પડે તો પણ તેનું પમાર્જન ન કરતા. તેમજ કાષ્ટ વગેરેથી શરીરની ખંજવાળ પણ દૂર કરતા ન હતા.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री चिंतामणिपार्श्वनाथ स्तोत्र ॥

किं कर्पूरमयं सुधारसमयं, किं चन्द्ररोचिर्मयम् ।
किं लावण्यमयं महामणिमयं, कारुण्यकेलिमयम् ।
विश्वानंदमयं महोदयमयं, शोभामयं चिन्मयम् ।
शुक्लध्यानमयं वपुर्जिनपते-र्भूयाद्भवालम्बनम् ॥१॥

पातालं कलयन् धरां धवलयन्, नाकाशमापूरयन्,
दिक्चक्रं क्रमयन् सुरासुरनरश्रेणिं च विस्मापयन् ।
ब्रह्माण्डं सुखयन् जलानि जलधेः, फेणच्छलालोलयन् ।
श्रीचिंतामणिपार्श्वसंभवयशो, हंसश्चिरं राजते ॥२॥

पुण्यानां विपणिस्तमोदिनमणिः, कामेभकुम्भशृणिः,
मोक्षेनिस्सरणिः सुरेन्द्रकरणी, ज्योतिः प्रभासारणिः ।
दाने देवमणिर्नतोत्तमजनश्रेणिः कृपासारिणी,
विश्वानंदसुधाघृणिर्भवभिदे, श्रीपार्श्वचिन्तामणिः ॥३॥

श्रीचिंतामणिपार्श्वविश्वजनतासंजीवनस्त्वं मया,
दृष्टस्तात ! ततः श्रियः समभवन् नाशक्रमाचक्रिणम्
मुक्तिः क्रीडति हस्तयोर्बहुविधं सिद्धं मनोवाञ्छितम्,
दुर्दैवं दुरितं च दुर्गतिभयं, कष्टं प्रणष्टं मम ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य प्रौढतमप्रतापतपनः, प्रोद्दामधामा जग-
ज्जंघालः कलिकालकेलिदलनो, मोहान्धविध्वंसकः ।
नित्योद्द्योतपदं समस्तकमलाकेलिगृहं राजते,
स श्रीपार्श्वजिनो जने [१]हितकृतो चिंतामणिः पातु मां ॥५॥

विश्वव्यापितमो हिनस्ति तरणिर्बालोऽपि कल्पांकुशो,
दारिद्र्याणि गजावलिं हरिशिशुः काष्टानि वह्नेः कणः ।
पीयूषस्य लवोऽपि रोगनिवहं यद्वत् तथा ते विभो,
मूर्तिः स्फूर्तिमती सती त्रिजगति कष्टानि हर्तुं क्षमः ॥६॥

श्रीचिंतामणिमंत्रमोंकृतियुतं, ह्रींकारसाराश्रितम्,
श्रीमर्हं नमिऊणपासकलितं त्रैलोक्यवश्यावहम्,
द्वेधाभूतविषापहं विषहरं श्रेयः प्रभावाश्रयम्,
सोल्लासं वसहांकितं जिनफुलिंगानंदनं देहिनाम् ॥७॥

ह्रीँ श्रीँ कारवरं नमोऽक्षरपरं, ध्यायन्ति ये योगिनो,
हृत्पद्मे विनिवेश्य पार्श्वमधिपं, चिंतामणीसंज्ञकम् ।
भाले वामभुजे च नाभिकरयो-र्भूयो भुजे दक्षिणे,
पश्चादष्टदलेषु ते शिवपदं द्वित्रैर्भवैर्यान्त्यहो ( र्भान्त्यहो ) ॥८॥

---

१. कृतहित, हितकरः इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नो रोगा नैव शोका न कलहकलना नारिमारिप्रचाराः,
नैवाधिर्नासमाधिर्न च दरदरिते, दुष्टदारिद्र्यता नो ।
नो शाकिन्यो ग्रहा नो हरिकरिगणा, व्यालवैतालजाला,
जायन्ते पार्श्वचिन्तामणिनतिवशतः, प्राणिनां भक्तिभाजाम् ॥९॥

गीर्वाणद्रुमधेनुकुंभमणयस्तस्यांऽगणे रंगिणो,
देवा दानवमानवा सविनयं, तस्मै हितध्यायिनः ।
लक्ष्मीस्तस्य वशावशैव गुणीनां, ब्रह्माण्डसंस्थायिनी,
श्रीचिन्तामणिपार्श्वनाथमनिशं, संस्तौति यो ध्यायते ॥१०॥

इति जिनपतिपार्श्वः पार्श्वपाश्र्वाख्ययक्षः,
प्रदलितदुरितौघः प्रीणितप्राणिसार्थः ।
त्रिभुवनजनवाञ्छा दानचिंतामणीकः,
शिवपदतरुबीजं बोधिबीजं ददातु ॥११॥

मायन्ने असणपाणस्स,
णाणुगिद्धे रसेसु अपडिण्णो ।
अच्छि वि णो पमज्जिज्जा,
णो विय कंडूयए मुणी गायं ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री मंत्राधिराज पार्श्वनाथ स्तोत्र ॥

श्री पार्श्वः पातु वो नित्यं, जिनः परमशङ्करः ।
नाथः परमशक्तिश्च, शरण्यः सर्वकामदः ॥१॥

सर्वविघ्नहरः स्वामी, सर्वसिद्धिप्रदायकः ।
सर्वसत्त्वहितो योगी, श्रीकरः परमार्थदः ॥२॥

देवदेवः स्वयंसिद्धश्चिदानन्दमयः शिवः ।
परमात्मा परब्रह्म, परमः परमेश्वरः ॥३॥

जगन्नाथः सुरज्येष्ठो, भूतेशः पुरुषोत्तमः ।
सुरेन्द्रो नित्यधर्मश्च, श्रीनिवासः शुभार्णवः ॥४॥

सर्वज्ञः सर्वदेवेशः, सर्वदः सर्वगोत्तमः ।
सर्वात्मा सर्वदर्शी च, सर्वव्यापी जगद्गुरुः ॥५॥

तत्त्वमूर्तिः परादित्यः परब्रह्मप्रकाशकः ।
परमेन्दुः परप्राणः, परमामृतसिद्धिदः ॥६॥

अजः सनातनः शम्भुरीश्वरश्च सदाशिवः ।
विश्वेश्वरः प्रमोदात्मा, क्षेत्राधीशः शुभप्रदः ॥७॥

साकारश्च निराकारः, सकलो निष्कलोऽव्ययः ।
निर्ममो निर्विकारश्च, निर्विकल्पो निरामयः ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमरश्चाजरोऽनन्त, एकोऽनेकः शिवात्मकः ।
अलक्ष्यश्चाऽप्रमेयश्च, ध्यानलक्ष्यो निरञ्जनः ॥९॥

ॐकाराकृतिरव्यक्तो, व्यक्तरूपस्त्रयीमयः ।
ब्रह्मद्वयप्रकाशात्मा, निर्भयः परमाक्षरः ॥१०॥

दिव्यतेजोमयः शान्तः, परामृतमयोऽच्युतः ।
आद्योऽनाद्यः परेशानः, परमेष्ठी परः पुमान् ॥११॥

शुद्धस्फटिकसङ्काशः, स्वयम्भूः, परमाच्युतः ।
व्योमाकारस्वरूपश्च, लोकालोकावभासकः ॥१२॥

ज्ञानात्मा परमानन्दः, प्राणारूढो मनःस्थितिः ।
मनः साध्यो मनोध्येयो, मनोदृश्यः परापरः ॥१३॥

सर्वतीर्थमयो नित्यः, सर्वदेवमयः प्रभुः ।
भगवान् सर्वतत्त्वेशः, शिवश्रीसौख्यदायकः ॥१४॥

इति श्रीपार्श्वनाथस्य, सर्वज्ञस्य जगद्गुरोः ।
दिव्यमष्टोत्तरं नाम, शतमत्र प्रकीर्तितम् ॥१५॥

पवित्रं परमं ध्येयं, परमानन्ददायकम् ।
भुक्तिमुक्तिप्रदं नित्यं, पठतां मङ्गलप्रदम् ॥१६॥

श्रीमत्परमकल्याणसिद्धिदः श्रेयसेऽस्तु वः ।
पार्श्वनाथजिनः श्रीमान् भगवान् परमः शिवः ॥१७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धरणेन्द्रफणाच्छत्रालङ्कृतो वः श्रियं प्रभुः ।
दद्यात् पद्मावतीदेव्या, समधिष्ठितशासनः ॥१८॥

ध्यायेत् कमलमध्यस्थं, श्रीपार्श्वजगदीश्वरम् ।
ॐ ह्रीँ श्रीँ अर्हं समायुक्तं, केवलज्ञानभास्करम् ॥१९॥

पद्मावत्याऽन्वितं वामे, धरणेन्द्रेण दक्षिणे ।
परितोऽष्टदलस्थेन, मन्त्रराजेन संयुतम् ॥२०॥

अष्टपत्रस्थितैः पञ्चनमस्कारैस्तथा त्रिभिः ।
ज्ञानाद्यैर्वेष्टितं नाथं, धर्मार्थकाममोक्षदम् ॥२१॥

सत्षोडशदलारूढं, विद्यादेवीभिरन्वितम् ।
चतुर्विंशतिपत्रस्थं, जिनमातृसमावृतम् ॥२२॥

मायावेष्ट्यत्रयाग्रस्थं, क्रौंकारसहितं प्रभुम् ।
नवग्रहावृतं देवं, दिक्पालैर्दशभिर्वृतम् ॥२३॥

चतुष्कोणेषु मन्त्राद्यैश्चतुर्बीजान्वितैर्जिनैः ।
चतुरष्टदशद्वीति द्विधाङ्कसंज्ञकैर्युतम् ॥२४॥

दिक्षु क्षकारयुक्तेन, विदिक्षु लाङ्कितेन च ।
चतुरस्त्रेण वज्राङ्कक्षितितत्त्वे प्रतिष्ठितम् ॥२५॥

श्रीपार्श्वनाथमित्येवं, यः समाराधयेज्जिनम् ।
तं सर्वपापनिर्मुक्तं, भजते श्रीः शुभप्रदा ॥२६॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनेशः पूजितो भक्त्या, संस्तुतः प्रस्तुतोऽथवा ।
ध्यातस्त्वं यैः क्षणं वापि सिद्धिस्तेषां महोदया ॥२७॥

श्रीपार्श्वमन्त्रराजान्ते, चिन्तामणिगुणास्पदम् ।
शान्तिपुष्टिकरं नित्यं, क्षुद्रोपद्रवनाशनम् ॥२८॥

ऋद्धिसिद्धिमहाबुद्धिधृतिश्रीकान्तिकीर्तिदम् ।
मृत्युञ्जयं शिवात्मानं, जपनान्नन्दितो जनः ॥२९॥
सर्वकल्याणपूर्णः स्याज्जरामृत्युविवर्जितः ।
अणिमादिमहासिद्धिं, लक्षजापेन चाप्नुयात् ॥३०॥

प्राणायाममनोमन्त्रयोगादमृतमात्मनि ।
त्वामात्मानं शिवं ध्यात्वा, स्वामिन् ! सिध्यन्ति जन्तवः ॥३१॥

हर्षदः कामदश्चेति, रिपुघ्नः सर्वसौख्यदः ।
पातु वः परमानन्दलक्षणः संस्मृतो जिनः ॥३२॥

तत्त्वरूपमिदं स्तोत्रं, सर्वमङ्गलसिद्धिदम् ।
त्रिसन्ध्यं यः पठेन्नित्यं, नित्यं प्राप्नोति स श्रियम् ॥३३॥

भगवतो हि गृहस्थभावेऽपि रसेषु गृद्धिर्नासीत् किं पुनः प्रव्रजितस्य ? तथा रसेष्वेव ग्रहणं प्रति अप्रतिज्ञः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री जीरावला पार्श्वनाथ स्तोत्र ॥

ॐ नमो देवदेवाय, नित्यं भगवतेऽर्हते ।
श्रीमते पार्श्वनाथाय, सर्वकल्याणकारिणे ॥१॥

ह्रीँ रूपाय धरणेन्द्र पद्मावत्यर्चितांघ्रये ।
शुद्धातिशयकोटिभिः, सहिताय महात्मने ॥२॥

अट्टे मट्टे पुरोदष्टे, विघट्टे वर्णपंक्तिवत् ।
दुष्टान् प्रेत-पिशाचादीन्, प्रणाशयति तेऽभिधा ॥३॥

स्तंभय स्तंभय स्वाहा, शतकोटि नमस्कृतः ।
अधमत् कर्मणां दुरादापतन्तीं विडम्बनां आपतन्तीर्विडम्बनाः ॥४॥

नाभिदेशोद्भवन्नाले, ब्रह्मरन्ध्रप्रतिष्ठिते ।
ध्यातमष्टदले पद्मे, तत्त्वमेतत् फलप्रदं ॥५॥

तत्त्वमत्र चतुवर्णी, चतुर्वर्णविमिश्रिता ।
पंचवर्ण-क्रम-ध्याता, सर्वकार्यकरी भवेत् ॥६॥

क्षि-प-ॐ स्वाहेतिवर्णैः, कृतपंचांगरक्षणः ।
योऽभिध्यायेदिदं तत्त्वं वश्यास्तस्याखिलश्रियः ॥७॥

पुरुषं बाधते बाढं, तावत्क्लेशपरंपरा ।
यावन्न मंत्रराजोऽयं, हृदि जागर्ति मूर्तिमान् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याधि-बंध-वध-व्याला-ऽनलाऽम्भसम्भवः भयः ।
क्षयं प्रयाति श्रीपार्श्वनामस्मरणमात्रतः ॥९॥

यथा नादमयो योगी, तथा चेत्तन्मयो भवेत् ।
तथा न दुष्करं किञ्चित्, कथ्यतेऽनुभवादीदम् ॥१०॥

इति श्रीजीरिकापल्ली-स्वामि पार्श्वजिनः स्तुतः ।
श्रीमेरुतुंगसूरेस्तात् सर्वसिद्धिप्रदायकः ॥११॥

'श्री' जीरावल्ली प्रभुपाश्वर्वं, पार्श्वयक्षेण सेवितम् ।
अर्चितं धरणेन्द्रेण, पद्मावत्या प्रपूजितं ॥१२॥

सर्वमंत्रमयं सर्वकार्यसिद्धिकरं परम् ।
ध्यायामि हृदयांभोजे, भूतप्रेतप्रणाशकम् ॥१३॥

श्रीमेरुतुंगसूरीन्द्रः, श्रीमत्पार्श्वप्रभोः पुरः ।
ध्यानस्थितं हृदि ध्यायन्, सर्वसिद्धिं लभेत् ध्रुवम् ॥१४॥

> પ્રભુ મહાવીર ! આપ
> એક તરફ અતુલ બલી છો
> તો બીજી તરફ શરીર પ્રત્યે સર્વથા
> અનાસક્ત છો. કેવું આશ્ચર્ય ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# महामंत्रगर्भित श्रीकलिकुंडपार्श्वनाथस्तोत्र

श्रीमद् देवेन्द्रवृन्दाऽमलमुकुटमणिज्योतिषां चक्रवालै-
र्व्यालीढं पादपीठं शठकमठकृतोपद्रवाऽबाधितस्य ।
लोकालोकावभासिस्फुरदुरुविमलज्ञानसद्दीप्रदीपः,
प्रध्वस्तध्वान्तजालः स वितरतु सुखं पार्श्वनाथोऽत्र नित्यम् ॥१॥
ह्राँ ह्रीँ ह्रूँ ह्रौँ विभास्वन्मरकतमणिभा कांतमूर्ते हि बं मो
हँ सँ तँ बीजमन्त्रैः कृतसकलजगत्क्षेमरक्षोरुवक्षाः ।
क्षाँ क्षीँ क्षूँ क्षौँ समस्तक्षितितलमहित ! ज्योतिरुद्योतिताशः,
ह्रीँ कारे रेफयुक्तं र र र र र र रां देव ! सं सं संयुक्तं
ह्रीँ क्लीँ ब्लूँ द्राँ समेतं वियदमलकलाक्रौँक्रकोद्भासि हुँ हूँ ॥२॥
धुं धुं धुं धुम्रवर्णैरखिलमिहजगन्मे विधेयानुकृष्णं,
वौषड्मन्त्रं पठन्तस्त्रिजगदधिपते ! पार्श्व मां रक्ष नित्यम् ॥३॥
आँ क्रौँ ह्रीँ सर्ववश्यं कुरु कुरु सरसं कार्मणं तिष्ठ तिष्ठ,
क्षं क्षं हं रक्ष रक्ष प्रबल-बल-महाभैरवारातिभीतेः ।
द्रां द्रीं द्रुं द्रावयन्ति द्रव हन हन तं फट् वषट् बन्ध बन्ध,
स्वाहा मंत्रं पठन्तस्त्रिजगदधिपते ! पार्श्व मां रक्ष नित्यम् ॥४॥
हँ हँ झाँ झाँ क्ष हंसः कुवलयकलितैरंचितांग ! प्रमत्ते
झाँ झाँ हं यक्ष हंसं हर हर हर हूँ पक्षि वः सत्क्षिकोपं
वं झं हं सः सहंसः वस सर सरसं सः सुधाबीजमंत्रै-
स्त्रायस्व स्थावरादेः प्रबलविषमुखहारिभिः पार्श्वनाथ ! ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्ष्माँ क्ष्मीँ क्ष्मूँ क्ष्मैँ क्ष्मरेतैरहपति-वितनुर्मंत्रबीजैश्च नित्यं
हाहाकारोग्रनादैर्ज्वलदनलशिखाकल्पदीर्घोर्ध्वकेशः ।
पिंगाक्षैर्लोलजिह्वैर्विषमविषधरालंकृतैस्तीक्ष्णादण्डै-
र्भूतैः प्रेतैः पिशाचैर्धनदकृतमहोपद्रवाद् रक्ष रक्ष ॥६॥

झ्रौं झ्रौं झः शाकिनीनां सपदहरसदं भिन्धि शुद्धेद्धबुद्धे-
ग्लौं क्ष्मँ ठँ दिव्य-जिह्वा गति-मति-कुपितः स्तंभनं संविधेहि ।
फट्फट् सर्वाधिरोगग्रहमरणभयोच्चाटनं चैव पार्श्व ! ।
त्रायस्वाशेषदोषादमरनरवरैर्मौर्त्तिपादारविन्दः ॥७॥

इत्थं मंत्राक्षरोत्थं वचनमनुपमं पार्श्वनाथस्य नित्यं
विद्वेषोच्चाटनं स्तंभन( वन१ ) जयवशं पापरोगापनोदैः ।
प्रोत्सर्पज्जंगमादिस्थविरविषमुखध्वसनं स्थायु दीर्घ-
मारोग्यैश्वर्ययुक्ता भवति पठति यः स्तौति तस्येष्टसिद्धिः ॥८॥

## ॥ श्री स्तंभन पार्श्वनाथ स्तुति ॥

कल्याणकेलिकमला कमलायमानम्
प्रोद्दामधाममहिमा महिमानिधानम् ।
जात्यश्मगर्भमणिमेचककान्तिदेहं
श्रीस्तंभनाधिपति पार्श्वजिनं स्तुवेऽहम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ।। श्री सिद्धसेनदिवाकरसूरिविरचित शक्रस्तव ।।

ॐ नमोऽर्हते भगवते परमात्मने परमज्योतिषे परमपरमेष्ठिने, परमवेधसे, परमयोगिने परमेश्वराय तमसः परस्तात् सदोदितादित्यवर्णाय, समूलोन्मूलितानादिसकलक्लेशाय ।।१।।

ॐ नमोऽर्हते भूर्भुवःस्वस्त्रयीनाथमौलिमन्दारमालार्चितक्रमाय, सकलपुरुषार्थयोनिनिरवद्यविद्याप्रवर्त्तनैकवीराय, नमः स्वस्तिस्वधास्वाहावषडर्थैकान्तशान्तमूर्त्तये, भवद्भाविभूतभावावभासिने, कालपाशनाशिने, सत्त्वरजस्तमोगुणातीताय, अनन्तगुणाय, वाङ्मनोऽगोचरचरित्राय, पवित्राय, करणकारणाय तरणतारणाय, सात्त्विकदैवताय, तात्त्विकजीविताय, निर्ग्रन्थपरमब्रह्महृदयाय योगीन्द्रप्राणनाथाय, त्रिभुवनभव्यकुलनित्योत्सवाय, विज्ञानानन्दपरब्रह्मैकात्म्यसात्म्यसमाधये, हरिहरहिरण्यगर्भादिदेवतापरिकलितसम्यग्स्वरूपाय, सम्यक्श्रद्धेयाय, सम्यग्ध्येयाय, सम्यग्शरण्याय, सुसमाहित सम्यक्स्पृहणीयाय ।।२।।

ॐ नमोऽर्हते भगवते आदिकराय, तीर्थकराय स्वयंसम्बुद्धाय, पुरुषोत्तमाय, पुरुषसिंहाय, पुरुषवरपुण्डरीकाय, पुरुषवरगन्धहस्तिने, लोकोत्तमाय, लोकनाथाय, लोकहिताय, लोकप्रदीपाय, लोकप्रद्योतकारिणे, अभयदाय दृष्टिदाय, मुक्तिदाय, मार्गदाय, बोधिदाय, जीवदाय, शरणदाय, धर्मदाय, धर्मदेशकाय, धर्मनायकाय, धर्मसारथये, धर्मवरचातुरन्तचक्रवर्तिने, व्यावृत्तच्छद्मने, अप्रतिहत-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यग्ज्ञानदर्शनसद्मने ॥३॥

ॐ नमोऽर्हते जिनाय जापकाय, तीर्णाय तारकाय, बुद्धाय बोधकाय, मुक्ताय मोचकाय, त्रिकालविदे, पारङ्गताय, कर्माष्टक-निषूदनाय, अधीश्वराय, सम्भवे, जगत्प्रभवे, स्वयम्भुवे जिनेश्वराय, स्याद्वादवादिने, सार्वाय, सर्वज्ञाय, सर्वदर्शिने, सर्वतीर्थोपनिषदे, सर्वपाखण्डमोचिने, सर्वयज्ञफलात्मने, सर्वज्ञकलात्मने, सर्वयोग-रहस्याय, केवलिने, देवाधिदेवाय, वीतरागाय ॥४॥

ॐ नमोऽर्हते परमात्मने, परमाप्ताय, परमकारुणिकाय, सुगताय, तथागताय, महाहंसाय, हंसराजाय, महासत्त्वाय, महाशिवाय, महाबोधाय, महामैत्राय, सुनिश्चिताय, विगतद्वन्द्वाय, गुणाब्धये, लोकनाथाय, जितमारबलाय ॥५॥

ॐ नमोऽर्हते सनातनाय, उत्तमश्लोकाय, मुकुन्दाय, गोविन्दाय, विष्णावे, जिष्णावे, अनन्ताय, अच्युताय, श्रीपतये, विश्वरूपाय, हृषीकेशाय, जगन्नाथाय, भूर्भूवःस्वःसमुत्ताराय, मानंजराय, कालंजराय, ध्रुवाय, अजाय, अजेयाय, अजराय, अचलाय, अव्ययाय, विभवे, अचिन्त्याय, असंख्येयाय, आदिसंख्याय, आदिकेशवाय, आदिशिवाय महाब्रह्मणे परमशिवाय, एकानेकानन्तस्वरूपिणे, भावाभावविवर्जिताय, अस्तिनास्तिद्वयातीताय, पुण्यपापविरहिताय, सुखदुःख विविक्ताय, व्यक्ताव्यक्तस्वरूपाय, अनादि-मध्यनिधानाय, नमोस्तु मुक्तीश्वराय मुक्तिस्वरूपाय ॥६॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ नमोऽर्हते निरातङ्काय, निःसङ्गाय, निःशङ्काय, निर्मलाय, निर्भयाय, निर्द्वन्द्वाय, निस्तरङ्गाय, निरूर्मये, निरामयाय, निष्कलङ्काय, परमदैवताय, सदाशिवाय, महादेवाय, शङ्कराय, महेश्वराय, महाव्रतिने, महायोगिने, महात्मने, पञ्चमुखाय, मृत्युञ्जयाय, अष्टमूर्तये, भूतनाथाय, जगदानन्दाय, जगत्पितामहाय, जगद्देवाधिदेवाय, जगदीश्वराय, जगदादिकन्दाय, जगद्भास्वते, जगत्कर्मसाक्षिणे, जगच्चक्षुषे, त्रयीतनवे, अमृतकराय, शीतकराय, ज्योतिश्चक्रचक्रिणे, महाज्योतिर्द्योतिताय, महातमः (पः) पारे सुप्रतिष्ठिताय, स्वयंकर्त्रे, स्वयंहर्त्रे, स्वयंपालकाय, आत्मेश्वराय, नमो विश्वात्मने ॥७॥

ॐ नमोऽर्हते, सर्वदेवमयाय, सर्वध्यानमयाय सर्वज्ञानमयाय, सर्वतेजोमयाय, सर्वमंत्रमयाय सर्वरहस्यमयाय, सर्वभावाभावजीवाजीवेश्वराय, अरहस्यरहस्याय, अस्पृहस्पृहणीयाय, अचिन्त्यचिन्तनीयाय, अकामकामधेनवे, असङ्कल्पितकल्पद्रुमाय, अचिन्त्यचिन्तामणये, चतुर्दशरज्ज्वात्मकजीवलोकचूडामणये, चतुरशीतिलक्षजीवयोनिप्राणिनाथाय, पुरुषार्थनाथाय, परमार्थनाथाय, अनाथनाथाय, जीवनाथाय, देवदानवमानवसिद्धसेनाधिनाथाय ॥८॥

ॐ नमोऽर्हते निरञ्जनाय, अनन्तकल्याणनिकेतनकीर्तनाय, सुगृहीतनामधेयाय (महिमामयाय) धीरोदात्तधीरोद्धत धीरशान्तधीरललितपुरुषोत्तमपुण्यश्लोकशतसहस्रलक्षकोटिवन्दित, पादारविन्दाय सर्वगताय ॥९॥

ॐ नमोऽर्हते सर्वसमर्थाय, सर्वप्रदाय, सर्वहिताय, सर्वाधि-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाथाय, कस्मैश्चन क्षेत्राय, पात्राय, तीर्थाय, पावनाय, पवित्राय, अनुत्तराय, उत्तराय, योगाचार्याय, संप्रक्षालनाय, प्रवराय, आग्रेयाय, वाचस्पतये, माङ्गल्याय, सर्वात्मनीनाय, सर्वार्थाय, अमृताय, सदोदिताय, ब्रह्मचारिणे, तायिने, दक्षिणीयाय, निर्विकाराय, वज्रर्षभनाराचमूर्त्तये, तत्त्वदर्शिने, पारदर्शिने, परमदर्शिने, निरुपमज्ञानबलवीर्यतेजःशक्त्यैश्वर्यमयाय, आदिपुरुषाय, आदिपरमेष्ठिने, आदिमहेशाय, महाज्योतिः-स( स्त )त्त्वाय महार्चिदानेश्वराय महामोहसंहारिणे, महासत्त्वाय, महाज्ञामहेन्द्राय, महालयाय, महाशान्ताय, महायोगीन्द्राय, अयोगिने, महामहीयसे, महाहंसाय, हंसराजाय, महासिद्धाय, शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्ति महानन्दं, महोदयं, सर्वदुःखक्षयं कैवल्यं, अमृतं निर्वाणमक्षरं, परमब्रह्मनिश्रेयसमपुनर्भवं, सिद्धिगतिनामधेयं स्थानं संप्राप्तवते, चराचरमवते, नमोऽस्तु श्रीमहावीराय, त्रिजगत् स्वामिने श्रीवर्धमानाय ॥१०॥

ॐ नमोऽर्हते, केवलिने, परमयोगिने भक्तिमार्गयोगिने, विशालशासनाय, सर्वलब्धिसम्पन्नाय, निर्विकल्पाय, कल्पनातीताय, कलाकलाप-कलिताय, विस्फुरदुरुशुक्लध्यानाग्निनिर्दग्धकर्मबीजाय, प्राप्तानन्तचतुष्टयाय, सौम्याय, शान्ताय, मङ्गलवरदाय, अष्टादशदोषरहिताय, संसृतविश्वसमीहिताय स्वाहा ॥११॥

ॐ ह्रीँ श्रीँ अर्हं नमः नो १०८ वार जाप करवो

लोकोत्तमो निष्प्रतिमस्त्वमेव, त्वं शाश्वतं मङ्गलमप्यधीश ।
त्वामेकमर्हन् ! शरणं प्रपद्ये, सिद्धर्षिसद्धर्ममयस्त्वमेव ॥१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वं मे माता पिता नेता, देवो धर्मो गुरुः परः ।
प्राणोः स्वर्गोऽपवर्गश्च, सत्त्वं तत्त्वं गतिर्मतिः ॥२॥
जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् ।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥३॥
यत्किञ्चित् कुर्महे देव ! सदा सुकृतदुष्कृतम् ।
तन्मे निजपदस्थस्य हुं, क्षः क्षपय त्वं जिन ! ॥४॥
गुह्यातिगुह्यगोप्ता त्वं, गृहाणास्मत्कृतं जपम् ।
सिद्धिः श्रयति मां येन, त्वत्प्रसादात्त्वयि स्थितम् ॥५॥
इति श्री वर्धमानजिननाममंत्रस्तोत्रं
प्रतिष्ठायां शान्तिकविधौ पठितं महासुखाय स्यात् ॥

१. इतीमं पूर्वोक्तमिन्द्रस्तवं एकादशमंत्रराजोपनिषद्गर्भं अष्ट-महासिद्धिप्रदं सर्वपापनिवारणं, सर्वपुण्यकारणं सर्वदोषहरं, सर्वगुणाकरं, महाप्रभावं, अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं, भवांतरकृतासंख्यपुण्यप्राप्यं सम्यग् जपतां, पठतां, श्रुण्वतां, गुणयतां, समनुप्रेक्षमाणानां भव्य जीवानां चराचरेऽपि विश्वे सद्वस्तु तन्नास्ति यत् करतल प्रणयि न भवतीति । किञ्च....

२. इतीमं पूर्वोक्तमिन्द्रस्तवमेकादश मन्त्रराजोपनिषद्गर्भं... इत्यादि यावत् सम्यग्समनुप्रेक्षमाणानां भव्यजीवानां भवनपतिव्यंतर-ज्योतिष्कवैमानिकवासिनो देवा सदा प्रसीदन्ति । व्याधयो विलीयन्ते ।

३. इतीमं० भव्यजीवानां पृथिव्यप्तेजोवायुगगनानि भवन्त्यनुकूलानि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

४. इतीमं० भव्यजीवानां सर्वसंपदां मूलं जायते जिनानुरागः ।
५. इतीमं० भव्यजीवानां साधवः सौमनस्येनानुग्रहपरा जायन्ते ।
६. इतीमं० भव्यजीवानां खलाः क्षीयन्ते ।
७. इतीमं० भव्यजीवानां जलस्थलगगनचराः क्रूरजन्तवोपि मैत्रीमया जायन्ते ।
८. इतीमं० भव्यजीवानां अधमवस्तुन्यप्युत्तमवस्तुभावं प्रतिपद्यन्ते ।
९. इतीमं० भव्यजीवानां धर्मार्थकामगुणा अभिरामा जायन्ते ।
१०. इतीमं० भव्यजीवानां ऐहिक्यः सर्वा अपि शुद्धगोत्रकलत्र-पुत्रमित्रधनधान्यजीवितयौवनरुपारोग्ययशःपुरःसराः सर्वजनानां संपदः परभागजीवितशालिन्यः सदुदर्काः सुसंमुखीभवन्ति ॥ किं बहुना ?
११. इतीमं० भव्यजीवानां आमुष्मिक्यः सर्वमहिमास्वर्गापवर्गश्रियोऽपि क्रमेण यथेच्छं( ष्टं ) स्वयं स्वयंवरणोत्सवसमुत्सुका भवन्तीति

सिद्धः ( द्धिः ) श्रेयः समुदयः ( समुदायः )
यथेन्द्रेण प्रसन्नेन समादिष्टोऽर्हतां स्तवः
तथायं सिद्धसेनेन लिलिखे ( प्रपेदे ) संपदां पदम् ॥

प्रमाद शुं छे ?

→ આત્માનું વિસ્મરણ → જિનાજ્ઞા ભંગ
→ વિષય-કષાયાધીનતા → અસંયમ
→ દોષો પ્રતિ પક્ષપાત.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ प्रथमं पावपडिग्घाय गुणबीजाहाणसुत्तं ॥

णमो वीयरागाणं, सव्वण्णूणं देविंदपूइआणं जहट्ठिअवत्थुवाईणं, तेलुक्कगुरूणं, अरुहंताणं भगवंताणं, जे एवमाइक्खंति - इह खलु अणाई जीवे, अणाई जीवस्स भवे, अणाईकम्मसंजोगनिव्वत्तिए, दुक्खरुवे, दुक्खफले, दुक्खाणुबंधे एअस्स णं वोच्छित्ती सुद्ध-धम्माओ, सुद्धधम्मसंपत्ती पावकम्मविगमाओ, पावकम्मविगमो तहाभव्वत्ताइभावाओ ।

तस्स पुण विवागसाहणाणि चउसरणगमणं दुक्कडगरिहा सुकडासेवणं अओ कायव्वमिणं होउकामेणं सया सुप्पणिहाणं भुज्जो भुज्जो संकिलेसे तिकालमसंकिलेसे । जावज्जीवं मे भगवंतो परमतिलोगनाहा अणुत्तरपुन्नसंभारा खीणरागदोसमोहा अचिंतचिंता-मणी भवजलहिपोया एगंतसरण्णा अरहंता सरणं ।

तहा पहीणजरामरणा अवेअकम्मकलंका पणट्ठवाबाहा केवल-नाणदंसणा सिद्धिपुरनिवासी निरुवमसुहसंगया सव्वहा कयकिच्चा सिद्धा सरणं ।

तहा पसंतगंभीरासया सावज्जजोगविरया पंचविहायारजाणगा, परोवयारनिरया पउमाइनिदंसणा, झाणज्झयणसंगया, विसुज्झमाण-भावा साहू सरणं ।

तहा सुरासुरमणुअपूइओ मोहतिमिरंसुमाली रागद्दोसविसपरममंतो, हेऊ सयलकल्लाणाणं, कम्मवणविहावसु साहगो सिद्धभावस्स,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलिपन्नत्तो धम्मो जावज्जीवं मे भगवं सरणं ।

सरणमुवगओ य एएसिं गरिहामि दुक्कडं, जं णं अरहंतेसु वा, सिद्धेसु वा, आयरिएसु वा, उवज्झाएसु वा, साहुसु वा, साहुणीसु वा, अन्नेसु वा धम्मट्ठाणेसु माणणिज्जेसु पूअणिज्जेसु, तहा माईसु वा, पिईसु वा, बंधुसु वा, मित्तेसु वा उवयारिसु वा, ओहेण वा जीवेसु, मग्गट्ठिएसु वा अमग्गट्ठिएसु वा, मग्गसाहणेसु वा, अमग्गसाहणेसु वा, जंकिंचि वितहमायरियं, अणायरिअव्वं अणिच्छिअव्वं, पावं पावाणुबंधि, सुहुमं वा, बायरं वा, मणेण वा, वायेण वा, कायेण वा, कयं वा, कारियं वा, अणुमोइयं वा, रागेण वा दोसेण वा, मोहेण वा, एत्थ वा जम्मे जम्मंतरेसु वा, गरहिअमेअं दुक्कडमेअं उज्झियव्वमेअं विआणिअं मए कल्लाणमित्तगुरुभगवंतवयणाओ, एवमेअं ति रोईअं सद्धाए, अरिहंतसिद्धसमक्खं गरिहामि अहमिणं 'दुक्कडमेअं उज्झियव्वमेअं' एत्थ मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं ।

होउ मे एसा सम्मं गरहा, होउ मे अकरणनियमो बहुमयं ममेअं ति । इच्छामो अणुसट्ठिं अरहंताणं भगवताणं गुरुणं कल्लाणमित्ताणं ति ।

होउ मे एएहिं संजोगो, होउ मे एसा सुपत्थणा, होउ मे इत्थ बहुमाणो होउ मे इओ मोक्खबीअं । पत्तेसु एएसु अहं सेवारिहे सिआ, आणारिहे सिया पडिवत्तिजुत्ते सिआ, निरईआरपारगे सिआ ।

संविग्गो जहासत्तीए सेवेमि सुकडं, अणुमोएमि सव्वेसिं अरहंताणं अणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरियाणं आयारं, सव्वेसिं उवज्झायाणं सुत्तप्पयाणं, सव्वेसिं साहूणं साहुकिरियं,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वेसिं सावगाणं मोक्खसाहणजोगे एवं सव्वेसिं देवाणं, सव्वेसिं जीवाणं होउकामाणं, कल्लाणाऽऽसयाणं, मग्गसाहणजोगे ।

होउ मे एसा अणुमोयणा सम्मं विहिपुव्विआ सम्मं सुद्धासया, सम्मं पडिवत्तिरूवा, सम्मं निरइयारा, परमगुणजुत्तअरहंतादिसामत्थओ अचिंतसत्तिजुत्ता हि ते भगवंतो वीअरागा सव्वण्णु परमकल्लाणा, परमकल्लाणहेऊ सत्ताणं ।

मूढे अम्हि पावे अणाइमोहवासिए, अणभिन्ने भावओ हिआहिआणं अभिन्ने सिआ, अहिअनिवित्ते सिआ, हिअपवित्ते सिआ । आराहगे सिआ, उचिअपडिवत्तिए सव्वसत्ताणं सहिअं ति इच्छामि सुक्कडं, इच्छामि सुक्कडं, इच्छामि सुक्कडं ।

एवमेअं सम्मं पढमाणस्स सुणमाणस्स, अणुप्पेहमाणस्स, सिढीली-भवंति परिहायंति, खिज्जंति असुहकम्माणुबंधा निरणुबंधे वा असुहकम्मे भग्गसामत्थे, सुहपरिणामेणं कडगबद्धे विअ विसे अप्पफले सिआ, सुहावणिज्जे सिआ, अपुणभावे सिआ ।

तहा आसगलिजंति, परिपोसिज्जंति, निम्मविज्जंति सुहकम्माणुबंधा, साणुबंधं च सुहकम्मं पगिट्ठं पगिट्ठभावज्जियं नियमफलयं । सुपउत्ते विअ महागए सुहफले सिया सुहपवत्तगे सिआ परमसुहसाहगे सिआ । अओ अपडिबंधमेअं असुहभावनिरोहेणं सुहभावबीअं ति, सुप्पणिहाणं सम्मं पढिअव्वं सम्मं सोअव्वं सम्मं अणुप्पेहिअव्वं ति । नमो नमियनमिआणं परमगुरुवीअरागाणं, नमो सेसनमुक्काराऱिहाणं जयउ सव्वण्णुसासणं परमसंबोहिए सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मुनिनाम् अप्रमादयन्त्रम्-[ उपमिति ]

**यावज्जीवमेते** नाचरन्ति **तनीयसीमपि परपीडां**, न भाषन्ते **सूक्ष्ममप्यलीकवचनं**, न गृह्णन्ति **दन्तशोधनमात्रमप्यदत्तं**, धारयन्ति **नवगुप्तिसनाथं ब्रह्मचर्यं**, वर्जयन्ति **निःशेषतया परिग्रहं**, न विदधते **धर्मोपकरणशरीरयोरपि ममत्वबुद्धिं**, नासेवन्ते **रजन्यां चतुर्भेद-मप्याहारजातं**, आददते **प्रवचनोपवर्णितं समस्तोपधिविशुद्धं संयम-यात्रामात्रसिद्धये निरवद्यमाहारादिकं**, वर्तन्ते **समितिगुप्ति-परिपूरितेनाचरणेन**, पराक्रमन्ते **विविधाभिग्रहकरणेन**, परिहरन्ति **अकल्याणमित्रयोगं**, दर्शयन्ति **सतामात्मभावं**, न **लङ्घयन्ति निजामुचितस्थितिं**, नापेक्षन्ते **लोकमार्गं**, मानयन्ति **गुरुसंहतिं**, चेष्टन्ते **तत्तन्त्रतया**, आकर्णयन्ति **भगवदागमं** भावयति **महायत्नेन**, अवलम्बते **द्रव्यापदादिषु धैर्यं**, **पर्यालोचन्त्यागामिनमपायं**, यतन्ते **प्रति-क्षणमसपत्नयोगेषु**, लक्षयन्ति **चित्तविश्रोतसिकां**, प्रतिविदधते **चानागतमेव तस्याः प्रतिविधानं**, निर्मलयन्ति **सततमसङ्गताभ्यासरततया मानसं**, अभ्यस्यन्ति **योगमार्गं**, **स्थापयन्ति चेतसि परमात्मानं**, निबध्नन्ति **तत्र धारणां**, परित्यजन्ति **बहिर्विक्षेपं**, कुर्वन्ति **तत्प्रत्यैक-तानमन्तःकरणं**, यतन्ते **योगसिद्धौ** आपूरयन्ति **शुक्लध्यानं**, पश्यन्ति **देहेन्द्रियादि-विविक्तमात्मानं**, लभन्ते **परमसमाधिं**, **शरीरिणोऽपि सन्तो मुक्ति-सुखभाजनम्** इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री शत्रुञ्जय लघुकल्प ॥

अइमुत्तय केवलिणा कहिअं सेत्तुंजतित्थमाहप्पं ।
नारयरिसिस्स पुरओ, तं निसुणह भावओ भविआ ॥१॥

सेत्तुंजे पुंडरीओ सिद्धो, मुणिकोडिपंचसंजुत्तो ।
चित्तस्स पुण्णिमाए, सो भण्णइ तेण पुंडरीओ ॥२॥

नमि-विनमिरायाणो, सिद्धा कोडिहिं दोहिं साहूणं ।
तह दविडवारिखिल्ला, निव्वुआ दस य कोडीओ ॥३॥

पज्जुन्न-संबपमुहा, अद्धुट्ठाओ कुमारकोडीओ ।
तह पंडवा वि पंच य, सिद्धिं गया नारयरिसी य ॥४॥

थावच्चासुय सेलगा य, मुणिणो वि तह राममुणी ।
भरहो दसरहपुत्तो, सिद्धा वंदामि सेत्तुंजे ॥५॥

अन्ने वि खवियमोहा, उसभाइ-विसाल-वंससंभूआ ।
जे सिद्धा सेत्तुंजे, तं नमह मुणी असंखिज्जा ॥६॥

पन्नासजोयणाइं, आसी सेत्तुंज-वित्थरो मूले ।
दस जोयण सिहरतले, उच्चत्तं जोयणा अट्ठ ॥७॥

जं लहइ अन्न तित्थे, उग्गेण तवेण बंभचेरेण ।
तं लहई पयत्तेणं, सेत्तुंजगिरिम्मि निवसंतो ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं कोडिए पुण्णं, कामिय-आहारभोइया जे उ ।
तं लहइ तत्थ पुण्णं, एगोववासेण सेत्तुंजे ॥९॥

जं किंचि नाम तित्थं, सग्गे पायालि माणुसे लोए ।
तं सव्वमेव दिट्ठं, पुंडरिए वंदिए संते ॥१०॥

पडिलाभंते संघं, दिट्ठमदिट्ठे य साहू सेत्तुंजे ।
कोडिगुणं च अदिट्ठे, दिट्ठे अ अणंतयं होइ ॥११॥

केवलनाणुप्पत्ती, निव्वाणं आसी जत्थ साहूणं ।
पुंडरिए वंदित्ता, सव्वे ते वंदिया तत्थ ॥१२॥

अट्ठावय सम्मेए, पावा चंपाइ उज्जंत नगे य ।
वंदित्ता पुण्णफलं, सयगुणं तं पि पुंडरीए ॥१३॥

पुआकरणे पुण्णं, एगगुणं सयगुणं च पडिमाए ।
जिणभवणेण सहस्संऽणंतगुणं पालणे होइ ॥१४॥

पडिमं चेइहरं वा, सित्तुंजगिरिस्स मत्थए कुणइ ।
भुत्तूण भरहवासं, वसइ सग्गे निरुवसग्गे ॥१५॥

नवकार-पोरिसीए, पुरिमड्ढ-गासणं च आयामं ।
पुंडरीयं च सरंतो, फलकंखी कुणइ अभत्तट्ठं ॥१६॥

छट्ठ-ट्ठुम-दसम-दुवालसाणं मास-ऽद्धमासखमणाणं ।
तिगरण सुद्धो लहइ, सित्तुंजं संभरतो अ ॥१७॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

छट्ठेणं भत्तेणं अपाणेणं तु सत्त जत्ताइं ।
जो कुणइ सेत्तुंजे, तइय भवे लहइ सो मुक्खं ॥१८॥

अज्जवि दीसइ लोए, भत्तं चइऊण पुंडरीय नगे ।
सग्गे सुहेण वच्चइ, सीलविहूणो वि होउणं ॥१९॥

छत्तं झयं पडागं, चामर-भिंगार-थालदाणेणं ।
विज्जाहरो अ हवइ, तह चक्की होइ रहदाणा ॥२०॥

दस वीस तीस चत्ता, लक्ख पन्नास पुप्फदामदाणेण ।
लहइ चउत्थ छट्ठऽट्ठम-दसम दुवालस फलाइं ॥२१॥

धुवे पक्खुववासो, मासक्खमणं कपूरधुवम्मि ।
कित्तिय मासक्खमणं, साहू पडिलाभिए लहइ ॥२२॥

न वि तं सुवन्नभूमि-भूसणदाणेण अन्न तित्थेसु ।
जं पावइ पुण्णफलं, पूआ न्हवणेण सित्तुंजे ॥२३॥

कंतार-चोर-सावय-समुद्द-दारिद्द-रोग-रिउ-रुद्दा ।
मुच्चंति अविग्घेणं, जे सेत्तुंजं धरन्ति मणे ॥२४॥

सारावली-पयन्नग-गाहाओ, सुअहरेण भणिआओ ।
जो पढइ गुणइ निसुणइ, सो लहइ सित्तुंजजत्तफलं ॥२५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ वर्धमान विद्या स्तव ॥

विलसंतजोईबीए, परमिट्ठिणं सरेमि पंचण्हं ।
सुह-तुट्ठि-पुट्ठि-संतिग,-आरुग्ग एए पए पयउ ॥१॥

केवलसिरितिलयाणं, अट्ठमहापाडिहेरकलियाणं ।
तिहुयण-पणयाणं, नमो अरिहंताणं सयाकालं ॥२॥

सिद्धिगईमुवगयाणं, अप्पडिहयवरनाणदंसणधराणं ।
सासयरूवाणं नमो सिद्धाणमणंतसोक्खाणं ॥३॥

जिणपहपयट्ठियाणं पंचविहायार-सार-चरियाणं ।
पवयण-वसहाण णमो आयरियाणं सुहनिहीणं ॥४॥

सययं नमो उवज्झायाणं, अणवरय-सुय-पयाणेणं ।
अणुग्गहिय-मुणिगणाणं, अहीण-वरनाण-जलहीणं ॥५॥

निच्चं पि नमो लोए सव्वसाहूणमणहवित्तीणं ।
मुत्तिवहुसंगमुस्सुयमणसाण वि निरभिसंगाणं ॥६॥

तह ओहि-परमोहि-सव्वोहि-अणंतओहिजिणाणं च ।
सज्जोइ पयाण नमो जिणाण सव्वेसिमेएसिं ॥७॥

तस्स य नमो भगवओ, महइ महा सिद्धिणो कुणइ विज्जा ।
वीरे य सेणवीरे जयंति, अपराजिए सव्वे ॥८॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाणेसो पंचनमुक्कारो, निवसइ मणे महामंतो ।
ताण न पिसाय-साइणि-भूयाइ-भयाइं पहवंति ॥९॥

सुमरिय मित्तो वि इमो, तिलोयरक्खाविवक्खमणमहणो ।
रण-रायग-पासाइसु, विजयपडायं पयच्छेइ ॥१०॥

गुणिओ य सव्वपावप्पणासणो, तहय मंगलाणं च ।
सव्वेसिं पढमं हवइ मंगलं सुमइसूरिहिं ॥११॥

इय वद्धमाणविज्जा चक्केसरपहुपसायसंपत्ता ।
पंच परमिट्ठुणो मह लहु हवंतु सुलहा पइभवंमि ॥१२॥
(पंचपरमिट्ठिणो महसु सुलहा हवंतु पइभवंमि)

# श्री धर्मचक्र विद्या

ॐ नमो भगवओ महई महावीरवद्धमाण-सामिस्स जस्स वरधम्मचक्कं जलंतं गच्छेई आयासं पायालं लोयाणं भूयाणं जुए वा, रणे वा, रायगणे वा, वारणे बंधणे मोहणे थंभणे सव्वसत्ताणं अपराजिओ भवामि स्वाहा ।

# परमेष्ठी मंत्र

ॐ नमो जिणाणं सरणाणं मंगलाणं लोगुत्तमाणं ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः असिआउसा त्रैलोक्यललामभूताय क्षुद्रोपद्रवशमनाय अर्हते नमः स्वाहा ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वर्धमान विद्या ( १ )

ॐ ह्रीं अर्हं ह्रूं ह्रः ह्रौं नमो वर्धमानस्वामिने स्वाहा ॐ वीरे वीरे महावीरे, जयवीरे सेणवीरे, वद्धमाणवीरे, जए विजए जयन्ते अपराजिते, सव्वट्ठसिद्धे निव्वुए महाणसे, महाबले स्वाहा ।

## ( २ )

ॐ ह्रीं नमो अरिहंताणं, ॐ ह्रीं नमो सिद्धाणं ॐ ह्रीं नमो आयरियाणं, ॐ ह्रीं नमो उवज्झायाणं, ॐ ह्रीं नमो लोए सव्वसाहूणं ॐ ह्रीं नमो भगवओ अरिहंतस्स ( अरहओ भगवओ ) महई महावीरवद्धमाणसा-मिस्स सिज्झउ मे भगवइ महइ महाविज्जा । ॐ वीरे वीरे महावीरे, जयवीरे, सेणवीरे, वद्धमाणवीरे जए विजए जयंते

अपराजिए अणिहए ॐ ह्रीं ठः ठः ठः स्वाहा ।

# महावीरस्तव

जइज्जा समणे भयवं महावीरे जिणुत्तमे ।
लोगणाहे सयंबुद्धे लोगंतिअविबोहिए ॥१॥

वच्छरं दिण्णदाणोह-सपूरिअजणासए ।
नाणत्तयसमाउत्ते, पुत्ते सिद्धत्थरायणो ॥२॥

चिच्चा रज्जं च रट्ठं च पुरं अंतेउरं तहा ।
णिक्खमित्ता अगाराओ पव्वइए अणगारियं ॥३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिसहाणं णो भीए भेरवाणं खमाखमे ।
पंचहा समिए गुत्ते बंभयारी अकिंचणे ॥४॥
निम्ममे निरहंकारे अकोहे मायवज्जिए ।
अमाए लोभविमुक्के पसंते छिन्नबंधणे ॥५॥
पुक्खरं व अलेवे य संखो इव निरंजणे ।
जीवे व्व अपडिग्घाए गयणं व निरासए ॥६॥
वाउ इव अपडिबद्धे कुम्मे व गुत्तइंदिए ।
विप्पमुक्के विहंग व्व खग्गिसिंग व्व एगाए ॥७॥
भारंडे व्व अप्पमत्ते अ वसहे व्व जायथामए ।
कुंजरो व्व सोंडीरे सीहो व्व दुद्धरिस्सए ॥८॥
सागरो इव गंभीरे चंदो व्व सोमलेस्सए ।
सूर व्व दित्ततेइल्ले हेमु व्व जायरूवए ॥९॥
सव्वंसहे धरित्ति व्व सायरंबु व्व सच्छए ।
सुहुहुअहुआस व्व जलमाणे य तेजसा ॥१०॥
वासीचंदणकप्पे य समाणे लिट्ठु-कंचणे ।
समे पूयावमाणेसु समे मुक्खे भवे तहा ॥११॥
नाणेणं दंसणेणं च चरित्तेणमणुत्तरे ।
आलएणं विहारेणं मद्दवेणज्जवेण य ॥१२॥
लाघवेणं च खंतीए गुत्तो मुत्ती अणुत्तरे ।
संवरेणं तवेणं च संजमेणं अणुत्तरे ॥१३॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणेगगुणसमाइण्णे धम्मसुक्काण झायए ।
घाइक्खएणं संजाए अणंतवरकेवली ॥१४॥
वीयरागे निग्गंथे सव्वण्णू सव्वदंसणे ।
देविंददाणविंदेहिं निवत्तिअमहामहे ॥१५॥
सव्वभासाणुगयाए भासाए सव्वसंसए ।
जुगवं सव्वजीवाणं छिन्नियं भिन्नगोचरे ॥१६॥
हिए सुहे य निस्सेयकारए सव्वपाणिणं ।
महव्वयाणि पंचेव पन्नवित्ता सभायणे ॥१७॥
संसारसायरंबुड्डुजन्तु-संताण-तारए ।
जाणु व्व देसियं तित्थं संपत्ते पंचमं गयं ॥१८॥
से सिवे अयले निच्चे अरुवे अजरामरे ।
कम्मपवंचविमुक्के जए वीरे जए जिणे ॥१९॥
से जिणे वद्धमाणे य महावीरे महायसे ।
असंखदुक्खखिन्नाणं अम्हाणं देउ निव्वुइं ॥२०॥
इय परमपमोया संथुओ वीरणाहो,
परमपसमदाणा देउ तुल्लत्तणं मे ।
असमदुह-सुहेसु सग्ग-सिद्धिभवेसु,
कणयकचवरेसु सत्तुमित्तेसु वा वि ॥२१॥
पयडियवसइपहाणं सीसेणं जिणेसराणं सुगुरुणं ।
वीरजिणत्थयमेयं पढह कयं अभयसूरीहिं ॥२२॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# गणि-पंन्यास पद धारक मुनिवरेषु प्रवर्तमान वर्धमान विद्या

ॐ नमो अरहओ भगवओ महावीर वद्धमाणसामिस्स

| | | |
|---|---|---|
| ॐ ह्रीँ नमो अणंतोहि जिणाणं | ॐ ह्रीँ नमो सिद्धाणं | ॐ ह्रीँ नमो ओहिजिणाणं |
| ॐ ह्रीँ नमोलोए सव्वसाहूणं | ॐ ह्रीँ नमो अरिहंताणं | ॐ ह्रीँ नमो आयरियाणं |
| ॐ ह्रीँ नमो सव्वोहि जिणाणं | ॐ ह्रीँ नमो उवज्झायाणं | ॐ ह्रीँ नमो परमोहि जिणाणं |

जये विजये जयन्ते अपराजिए ॐ ह्रीँ श्रीँ अणिहये स्वाहा

सिज्झउ मे भयवं महाविज्जा

ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाण वीरे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# बृहद्वीर [ वर्धमान ] विद्या

ॐ नमो अरिहंताणं । ॐ नमो सिद्धाणं । ॐ नमो आयरियाणं । ॐ नमो उवज्झायाणं । ॐ नमो लोए सव्वसाहूणं । ॐ ह्रीँ नमो जिणाणं । ॐ ह्रीँ नमो ओहिजिणाणं ॐ ह्रीँ नमो परमोहि जिणाणं । ॐ ह्रीँ नमो सव्वोहि जिणाणं । ॐ ह्रीँ नमो अणंतोहि जिणाणं । ॐ नमो कुट्ठबुद्धीणं । ॐ नमो बीयबुद्धीणं । ॐ नमो पयाणुसारीणं । ॐ नमो संभिन्नसोइणं । ॐ नमो उज्जुमईणं । ॐ नमो विउलमईणं । ॐ नमो चउद्दसपुव्वीणं । ॐ नमो दसपुव्वीणं । ॐ नमो अट्ठंगमहानिमित्तकुसलाणं । ॐ नमो विउव्विणइड्ढिपत्ताणं । ॐ नमो विज्जाहरसमणाणं । ॐ नमो पन्नासमणाणं । ॐ नमो चारणसमणाणं । ॐ नमो आगासगामीणं । ॐ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्झउ मे भगवई महाविज्जा । ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जये विजये जयन्ते अपराजिए सव्वट्ठसिद्धे अणिहए महाणसे महाबले महाबले २ सर्वज्ञानं ॐ ह्रीँ यः सः क्षः स्वाहा । ॐ ह्राँ ह्रीँ ह्रूँ ह्रौ ह्रः ज्राँ ज्रौं प्रौं स्वाहा । ॐ ह्रीँ श्रीँ श्री ह्री धृति कीर्ति बुद्धिलक्ष्मी स्वाहा ।

• • •

ॐ मुक्तिसौख्य प्रदां ध्यायेत् विद्यां पञ्चदशाक्षरीं ।
सर्वज्ञानं स्मरेन्मन्त्रं सर्वज्ञान प्रकाशनं ॥१॥

विद्या यथा → ॐ नमो अरिहंतसिद्ध सयोगिकेवलि स्वाहा ।

• • •



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वज्ञमन्त्रो यथा → ॐ श्रीं ह्रीं अर्हं नमः

वक्तुं न कश्चिदस्य प्रभावं सर्वतः क्षमः ।
समं भगवतां साम्यं सर्वज्ञानं बिभर्ति य ॥२॥

पञ्चवर्णं स्मरेन्मन्त्रं ध्यायेत् सर्वाभयप्रदं ॥ ॐ नमो सिद्धाणं इति मालोचितं यथा → ॐ नमो अर्हत परमेष्ठिने परमयोगिने विस्फुरदुरुशुक्लध्यानाग्निना निर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौख्याय वरदाय मङ्गलाय स्वाहा । जापः १०००८, अष्टादश दोषरहिताय स्वाहा ॥ जाप १००८ प्रथममक्षतैर्जापः पश्चात्पुष्पैर्जापः ॥

विद्या

ॐ ह्रां अर्हं नमो अरहंताणं । ॐ ह्रीं नमो सिद्धाणं ॐ ह्रूं नमो आयरियाणं । ॐ ह्रैं नमो ह्रौं उवज्झायाणं ॐ ह्रः नमो लोए सव्वसाहूणं । ॐ नमो भगवओ अरिहंतस्स महइ महावीर वद्धमाणसामिस्स सिज्झउ मे भगवइ महइ महाविज्जा । ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे महानंदणे सिसारवण्ण घोससारे सिद्धे सिद्धबीए अणिहए नायघोषे परमे परमसुहगे परमयपत्ते जये विजये जयन्ते अपराजिए सव्वुत्तमे स्वाहा ।

त्रिभुवन स्वामिनी विद्या ।

ॐ जोग्गे मग्गे तच्चे भूए सव्वे भविस्से अन्ते पक्खे जिन पक्खे स्वाहा ।

कामधेनुमिवाचिन्त्यफलसंपादन क्षमां ।
अनवद्या जपेत् विद्यां गणभृत् वदनोद्गतां ॥
मंत्रा प्रणवपूर्वोऽयं फलमिहिषामिच्छूभिः ।
प्रणव हीनस्तु निर्वाणपदकांक्षिभिः गणभृद्भिः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॐकार विद्या स्तवन

प्रणवस्त्वं ! परब्रह्मन् ! लोकनाथ ! जिनेश्वर ! ।
कामदस्त्वं मोक्षदस्त्वं, ॐकाराय नमो नमः ॥१॥

पीतवर्णः श्वेतवर्णो, रक्तवर्णो हरिद्वरः ।
कृष्णवर्णो मतो देवः, ॐकाराय नमो नमः ॥२॥

नमस्त्रिभुवनेशाय, रजोऽपोहाय भावतः ।
पञ्चदेवाय शुद्धाय, ॐकाराय नमो नमः ॥३॥

मायादये नमोऽन्ताय, प्रणवान्तमयाय च ।
बीजराजाय हे देव ! ॐकाराय नमो नमः ॥४॥

घनान्धकारनाशाय, चरते गगनेऽपि च ।
तालुरन्ध्रसमायाते, सप्रान्ताय नमोनमः ॥५॥

गर्जन्तं मुखरन्ध्रेण, ललाटान्तरसंस्थितम् ।
पिधानं कर्णरन्ध्रेण, प्रणवं तं वयं नमः ॥६॥

श्वेते शान्तिकपुष्ट्याख्याऽनवद्यादिकराय च ।
पीते लक्ष्मीकरायापि, ॐकाराय नमो नमः ॥७॥

रक्ते वश्यकरायापि, कृष्णे शत्रुक्षयकृते ।
धूम्रवर्णे स्तम्भनाय, ॐकाराय नमो नमः ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रह्मा विष्णु शिवो देवो, गणेशो वासवस्तथा ।
सूर्यश्चन्द्रस्त्वमेवातः, ॐकाराय नमो नमः ॥९॥

न जपो न तपो दानं, न व्रतं संयमो न च ।
सर्वेषां मूलहेतुस्त्वं, ॐकाराय नमो नमः ॥१०॥

इति स्तोत्रं जपन् वाऽपि, पठन् विद्यामिमां परा ।
स्वर्गं मोक्षं पदं धत्ते, विद्येयं फलदायिनी ॥११॥

करोति मानवं विज्ञमज्ञं, मानविवर्जितम् ।
समानं स्यात् पंचसुगुरोर्विद्यैका सुखदा परा ॥१२॥

उच्चालइय निहणंसु अदुवा आसणाउ खलइंसु ।
वोसट्ठकायपणयाऽऽसी दुक्खसहेभगवं अपडिन्ने ॥
=પ્રભુને ઊંચે ઉપાડીને નીચે ફેંક્યા કે આસનોથી પાડી દીધા. તો પણ પ્રભુ તો કાયાને વોસિરાવીને પરિષહો સહન કરતા હતા. દુ:ખ દૂર કરવાની ઈચ્છા રહિત પ્રભુ દુ:ખ સહન કરતા હતા.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ह्रींकार विद्या स्तवन

सवर्ण-पार्श्व-लय-मध्यसिद्धमधीश्वरं भास्वररूपभासम् ।
खण्डेन्दु-बिन्दु-स्फुटनाद-शोभं, त्वां शक्तिबीजं प्रमनाः प्रणौमि ॥१॥

ह्रींकारमेकाक्षरमादिरूपं, मायाक्षरं कामदमादिमन्त्रम् ।
त्रैलोक्यवर्णं परमेष्ठिबीजं, विज्ञाः स्तुवन्तीशभवन्तमित्थम् ॥२॥

शिष्यः सुशिक्षां सुगुरोरवाप्य, शुचीर्वशी धीरमनाश्च मौनी ।
तदात्मबीजस्य तनोतु जापमुपांशु, नित्यं विधिना विधिज्ञः ॥३॥

त्वां चिन्तयन् श्वेतकरानुकारं, ज्योत्स्नामयीं पश्यति यस्त्रिलोकीं ।
श्रयन्ति तं तत्क्षणतोऽनवद्यविद्या कलाशान्तिकपौष्टिकानि ॥४॥

त्वामेव बालारुणमण्डलाभं, स्मृत्वा जगत् त्वत्करजालदीप्रम् ।
विलोकते यः किल तस्य विश्वं, विश्वं भवेत् वश्यमवश्यमेव ॥५॥

यस्तप्तचामीकरचारुदीप्रं, पिङ्गः प्रभं त्वां कलयेत् समन्तात् ।
सदा मुदा तस्य गृहे सहेलिं, करोति केलिं कमला चलाऽपि ॥६॥

यः श्यामलं कज्जलमेचकाभं, त्वां वीक्षते वा तुषधूमधूम्रम् ।
त्रिपक्षः पक्षखलुतस्य वाताहताऽभ्रवद् यात्यचिरेण नाशम् ॥७॥

आधारकन्दोद्गततन्तुसूक्ष्म-लक्ष्योद्भवं ब्रह्मसरोजवासम् ।
यो ध्यायति त्वां स्त्रवदिन्दुबिम्बामृतं स च स्यात् कविसार्वभौमः ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड्दर्शनी स्वस्वमतापलेपैः, स्वे दैवते तन्मयबीजमेव ।
ध्यात्वा तदाराधनवैभवेन भवेदजेयः परवादिवृन्दैः ॥९॥

किं मन्त्रतन्त्रैर्विविधागमोक्तैः दुःसाध्य-संशीतिफलात्मलाभैः ।
सुसेव्यः सद्यः फलचिन्तितार्थाधिकप्रदश्चेदसि चेत्त्वमेकः ॥१०॥

चौरारि-मारि-ग्रह-रोग-लूता-भूतादि-दोषानल-बन्धनोत्थाः ।
भियः प्रभावात् तव दूरमेव, नश्यन्ति पारीन्द्ररवादिवेभाः ॥११॥

प्राप्नोत्यपुत्रः सुतमर्थहीनः, श्रीदायते पत्तिरपीशतीह ।
दुःखी सुखी चाथ भवेन्न किं किं, तद्रुपचिंतामणिचिन्तनेन ॥१२॥

पुष्पादि-जापामृत-होम-पूजा, क्रियाधिकारः सकलोऽस्तु दूरे ।
यः केवलं ध्यायति बीजमेव सौभाग्यलक्ष्मीर्वृणुते, स्वयं तम् ॥१३॥

तत्त्वोऽपि लोकाः सुकृतार्थकाम, मोक्षान् पुमर्थांश्चतुरां लभन्ते ।
यास्यन्ति याता अथ यान्ति ये ते, श्रेयःपदं त्वन्महिमालवः सः॥१४॥

विधाय यः प्राक्प्रणवं नमोऽन्ते, मध्येकबीजं ननु जज्जपीति ।
तस्यैकवर्णां वितनोत्यवध्या कामार्जुनी कामितमेव विद्या ॥१५॥

मालमिमां स्तुतिमयी, सुगुणां त्रिलोकी,
बीजस्य यः स्वहृदये निधयेत् क्रमात् सः !
अङ्केऽष्टसिद्धि रभसा लुठतीह तस्य,
नित्यं महोत्सवपदं लभते क्रमात् सः ॥१६॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ नमस्कारमंत्राधिराजस्तोत्रम् ॥

यः सर्वदुःखदलने किल कल्पवृक्षश्चिंतामणी शुभमनोरथपूरणे सः ।
कन्दर्पदर्पदलनैकविधौ दवाग्निर्लोकत्रये विजयते परमेष्ठिमंत्रः ॥१॥

सर्वागमश्रुतसमुद्रसुधेन्दुसारः चारित्रचंदनवनं सदनं सुखानां ।
कल्याणकुन्दनखनिर्दमनं दराणं, लोकत्रये विजयते परमेष्ठिमंत्रः ॥२॥

संसारसागरनिमज्जदपूर्वनौका सिद्धौषधिर्विविधरोगविनाशने च ।
निःशेषलब्धिबलबोधतरोश्च बीजं लोकत्रये विजयते परमेष्ठिमंत्रः ॥३॥

सूर्यसहस्त्रकिरणैर्हरति तमांसि सिंहो यथा गजगणांश्च नखैर्निहन्ति,
संसारवर्तिदुरितानि तथैव मंत्रो लोकत्रये विजयते परमेष्ठिमंत्रः ॥४॥

पद्माकरे रुचिररश्मिभिरौषधीशं शीघ्रं प्रबोधयति निद्रितकैरवाणि ।
अन्तः सुषुप्तगुणपद्मदलानि चैवं लोकत्रये विजयते परमेष्ठिमंत्रः ॥५॥

भूमंडलेषु शुभवस्तु न विद्यते तत् ध्यानेन यस्य ननु यन्नहि साधनीयम् ।
दुःखं न तद् भवति यस्य विनाशनं नो लोकत्रये विजयते परमेष्ठिमंत्रः॥६॥

श्रीपालदेवधरणेन्द्रसुदर्शनाद्या पल्लिपतिश्च शिवकंबलशंबलाद्याः ।
ध्यात्वा हि यं पद्मगुः परमं पवित्रं लोकत्रये विजयते परमेष्ठिमंत्रः॥७॥

भक्त्या दधाति हृदि यो ननु मंत्रराजं दिव्यां गतिं व्रजति नूतनमुक्तिमोदं
चूर्णीकरोति भवसञ्चितकर्मशैलं लोकत्रये विजयते परमेष्ठिमंत्रः ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री लब्धिपदगर्भितमहर्षिस्तोत्र ॥

जिनास्तथा सावधयश्चतुर्धा, सत्केवलज्ञानधनास्त्रिधा च ।
द्विधा मनःपर्यवशुद्धबोधा, महर्षयः सन्तु सतां शिवाय ॥१॥

सुकोष्ठसद्बीजपदानुसारि-धियो द्विधा पूर्वधराधिपाश्च ।
एकादशाङ्गाष्टनिमित्तविज्ञा, महर्षयः सन्तु सतां शिवाय ॥२॥

संस्पर्शनं संश्रवणं समन्ता-दास्वादन-घ्राण-विलोकनानि ।
संभिन्नसंस्त्रोततया विदन्ते, महर्षयः सन्तु सतां शिवाय ॥३॥

आमर्शविप्रण्मलखेलजल्ल-सर्वौषधिद्दष्टिवचोविषाश्च ।
आशीविषा घोरपराक्रमाश्च, महर्षयः सन्तु सतां शिवाय ॥४॥

प्रश्नप्रधानाः श्रमणा मनोवाग्वपुर्बला वैक्रियलब्धिमन्तः ।
श्रीचारणव्योमविहारिणश्च, महर्षयः सन्तु सतां शिवाय ॥५॥

घृतामृतक्षीरमधूनि धर्मोपदेशवाणीभिरभिस्त्रवन्तः ।
अक्षीणसंवासमहानसाश्च, महर्षयः सन्तु सतां शिवाय ॥६॥

सुशीततेजोमयतप्तलेश्या, दीप्रं तथोग्रं च तपश्चरन्तः ।
विद्याप्रसिद्धा अणिमादिसिद्धा, महर्षयः सन्तु सतां शिवाय ॥७॥

अन्येपि ये केचन लब्धिमन्तस्ते सिद्धचक्रे गुरुमण्डलस्थाः ।
ॐ ह्रीँ तथा ऽर्हँ नम इत्युपेता, महर्षयः सन्तु सतां शिवाय ॥८॥

इत्यादिलब्धिनिधानाय श्रीगौतमस्वामिने स्वाहा ।
गणसंपत्समृद्धाय श्रीसुधर्मस्वामिने स्वाहा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# लब्धिपदफलप्रकाशक कल्प

ॐ नमो अरहंताणं नमो जिणाणं ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अप्रतिचक्रे फट् विचक्राय स्वाहा। ॐ ह्रीँ अर्हं अ सि आ उ सा ह्रौँ ह्रौँ स्वाहा। एतत् सर्वं प्रयोजनीयम्, विसूचिकाशान्तिर्भवन्ति १।

'ॐ नमो अरहंताणं नमो जिणाणं ह्राँ पुष्प १०८ जपेत्, ज्वरनाशनम् २।

'णमो परमोहिजिणाणं ह्राँ' शिरोरोगनाशनम् ३।

'णमो सव्वोहिजिणाणं ह्राँ' अक्षिरोगनाशनम् ४।

'णमो अणंतोहिजिणाणं' कर्णरोगं नाशयति ५।

'णमो कुट्ठबुद्धीणं' शूल-गुल्म-उदररोगं नाशयति ६।

'णमो बीजबुद्धीणं' श्वास-हिक्कादि नाशयति ७।

'णमो पदाणुसारीणं' परैः सह विरोधं कलहं नाशयति ८।

'णमो संभिन्नसोयाणं' कासं नाशयति ९।

'णमो पत्तेयबुद्धाणं' प्रतिवादिविद्याच्छेदनम् १०।

'णमो सयंबुद्धाणं' कवित्वं पाण्डित्यं भवति ११।

'णमो बोहिबुद्धाणं' अन्यतरगृहीते श्रुते एकसंघो भवति ५२ दिनं यावज्जपेत् १२।

'णमो उज्जुमईणं' शान्तिकं भवति, दिन २४ यावज्जपेत् १३।

'णमो विउलमईणं' बहुश्रुतत्वम्, लवणाम्लवर्जं भोजनम् १४।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'णमो दसपुव्वीणं' सर्वाङ्गवेदी भवति १५ ।

'णमो चउदसपुव्वीणं' जापः १०८ स्वसमय-परसमयवेदी भवति १६।

'णमो अट्ठंगनिमित्तकुसलाणं' जीवित-मरणादिकं जानाति १७ ।

'णमो विउव्वणरिद्धिपत्ताणं'

काम्यवस्तूनि प्राप्नोति, दिन २८ जापः १८।

'णमो विज्जाहराणं' उद्देशप्रदेशमात्रं खे गच्छति १९।

'णमो चारणाणं' चिन्तामुष्टिपदार्थस्वरूपं जानाति २० ।

'णमो पण्हसमणाणं' आयुरवसानं जानाति २१।

'णमो आगासगामीणं' अन्तरिक्षे योजनमात्रं गमयति २२ ।

'णमो आसीविषा( सा )णं' विद्वषणं पाश्र्वाष्टकमन्त्रक्रमेण २३।

'णमो दिट्ठीविसाणं' स्थावर जङ्गम-कृत्रिमविषं नाशयति २४।

'णमो उग्गतवाणं' वाचास्तम्भनम् २५।

'णमो दित्ततवाणं' रविवाराद् दिनत्रयं मध्याह्ने जापः, सेनास्तम्भ २६।

'णमो तत्ततवाणं' जलं परिजप्य पिबेत्, अग्निस्तम्भः २७।

'णमो महातवाणं' जलस्तम्भनम् २८ ।

'णमो घोरतवाणं' विष-सर्प्प-मुखरोगादिनाशः २९।

'णमो घोरगुणाणं' लूतागर्भपिटकादि नाशयति ३०।

'णमो घोरगुणपरक्कमाणं' दुष्टमृगादीनां भयं नाशयति ३१।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'णमो घोरगुणबंभचारीणं' ब्रह्मराक्षसादि नाशयति ३२।

'णमो आमोसहिपत्ताणं' जन्मान्तरवैरेण पराभवं न करोति ३३।

'णमो खेलोसहिपत्ताणं' सर्वानपमृत्यूनपहरति ।३४।

'णमो खेलोसहिपत्ताणं' अपस्मारमवलेपं चित्तविप्लवं नाचयति ३५।

'णमो विप्पोसहिपत्ताणं' गजमारी शाम्यति ३६।

'णमो सव्वोसहिपत्ताणं' मनुष्यमरकं नाशयति ३७।

'णमो मणबलीणं' अश्वमारी शाम्यति ३८।

'णमो वचोबलीणं' अजमारी शाम्यति ३९।

'णमो कायबलीणं' गोमारी शाम्यति ४०।

'णमो अमयसवीणं' समस्तमुपसर्गं शमयति ४१।

'णमो सप्पिसवीणं' एकाहिक-द्वयाहिक-त्र्याहिक-चातुर्थिक-पाक्षिक-मासिक-सांवत्सरिक-वातादिसमस्तज्वरं नाशयति ४२।

'णमो खीरसवीणं' गोक्षीरं परिजप्य पिबेत्,
दिन २४, क्षयं कासं गण्डमालादिकं च नाशयति ४३।

'णमो अक्खीणमहाणसाणं' आकर्षणं ४४।

'णमो लोए सव्वसिद्धायदाणं' राजपुरुषादिवश्यं ४५।

'ॐ णमो भगवदो महदि महावीरवड्ढमाणबुद्धिरिसीणं' चेतः-समाधिमवस्थायां प्राप्नोति ४६ ।

॥ इति लब्धिपदफलप्रकाशकः कल्पः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ सिद्धचक्रस्तोत्र ॥

ऊर्ध्वाधोरयुतं सबिन्दुसकलं ब्रह्मस्वरावेष्टितं,
वर्गापूरितमष्टपत्रममलं सत्सन्धितत्त्वार्पितम् ॥
अन्तः पत्रतटेष्वनाहतपदं ह्रींकारसंवेष्टितं,
देवं ध्यायति यः पुमान् स भवति वैरीभकण्ठीरवः ॥१॥

यद्वर्गाष्टकपूरितं वरदलं सानाहतं नीरजं
यह्रींकारकलापबिन्दुकलितं मध्ये त्रिरेखाङ्कितम् ॥
यत्सर्वार्थकरं परं गुणवतां कालत्रये वर्तिनां
तत्क्लेशौघविनाशनं भवतु नः श्रीसिद्धचक्रेश्वरम् ॥२॥

शब्दब्रह्मैकलीनं प्रबलबलयुतं सर्वतत्त्वप्रभावं,
सानन्दं सर्वभद्रं गणधरवलयं दुःखपाशप्रणाशनम् ॥
यन्नैमित्तं वरिष्ठविपदि हृदि धृतं सज्जनानां च नित्यं
तद् दत्तं यस्य बाहौ रिपुकुलमथनं सिद्धचक्रं नमामि ॥३॥

यच्छुद्धं व्योमबीजं ह्यध-उपरि रा( या )न्त-सिद्धाक्षरेण,
यत्सन्धौ तत्त्वयुक्तं स्वपरमपदैर्वेष्टितं मध्यबीजम् ।
यत्सीमन्तं निरतं विगतकलिमलं मायया वेष्टिताङ्गं
जीयात् तत् सिद्धचक्रं विमलवरगुणं देवनागेन्द्रवन्द्यम् ॥४॥

यद् वश्यादिककारकं बहुविधं कामार्थिनां कामदम्
यल्लक्षाधिकजापसिद्धविमलं सत्संपदां दायकम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् कुष्ठादिकदुष्टदोषदलनं दुःखाभिभूतात्मनाम्
यत् तत्त्वैकफलप्रदं विजयतां श्रीसिद्धचक्रं भुवि ॥५॥

ऊर्ध्वाधोरेफयुक्तं गगनमुपहतं बिन्दुनाऽनाहतेन
ह्रींकारेण प्रकृष्टं स्वरसुगुरुपदैर्वेष्टितं बाह्यदेशे ।
पद्मं वर्गाष्टकाङ्कं दलमुखविवरेऽनाहताढ्यं तदित्थं ?
ह्रींकारेण त्रिवेष्टं कलशवलयितं सिद्धिदं सिद्धचक्रम् ॥६॥

व्योमोर्ध्वाधोरयुक्तं शिरसि च विलसन् नादबिन्द्वर्धचन्द्रम्
स्वाहान्तौंकारपूर्वैर्गुरुभिरभिवृत-सस्वरं चाष्टवर्गम् ।
अन्तस्थानाहतश्रीगणधरवलयालङ्कृतं ध्यानसाध्यं
वन्दे श्रीसिद्धचक्रं सुरगणमहितं मायया त्रिःपरीतम् ॥७॥
यत् सर्वाङ्गिहितं मनुष्यमहितं सौख्यालयं धर्मिणाम्
यद् दोषैः परिवर्जितम् सुगदितं ध्यानाधिरूढाङ्कितम् ।
यत् कर्मक्षयकारकं सुधवलं मन्त्राधिपाधिष्ठितम्
तन्नः पातु वरं भवाब्धिशमनं श्रीसिद्धचक्रं सदा ॥८॥

अलोलुए नाम उक्कोसेसु आहारादिसु अलुद्धो भवइ अहवा जो अप्पणो वि देहे अपडिबद्धो सो अलोलुओ (अलोलुय) भण्णइ ।

दश. चूर्णि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ श्री गौतमाष्टकम् ॥

श्रीइन्द्रभूतिं वसुभूतिपुत्रं, पृथ्वीभवं गौतमगोत्ररत्नम् ।
स्तुवन्ति देवासुरमानवेन्द्राः, स गौतमो यच्छतु वाञ्छितं मे ॥१॥

श्रीवर्धमानात् त्रिपदीमवाप्य, मुहूर्तमात्रेण कृतानि येन ।
अङ्गानि पूर्वाणि चतुर्दशाऽपि,स गौतमो यच्छतु वाञ्छितं मे ॥२॥

श्रीवीरनाथेन पुरा प्रणीतम्, मन्त्रं महानन्दसुखाय यस्य ।
ध्यायन्त्यमी सूरिवराः समग्राः,स गौतमो यच्छतु वाञ्छितं मे ॥३॥

यस्याभिधानं मुनयोऽपि सर्वे, गृह्णन्ति भिक्षाभ्रमणस्य काले ।
मिष्टान्नपानाम्बरपूर्णकामाः, स गौतमो यच्छतु वाञ्छितं मे ॥४॥

अष्टापदाद्रौ गगने स्वशक्त्या, ययौ जिनानां पदवन्दनाय ।
निशम्य तीर्थातिशयं सुरेभ्यः,स गौतमो यच्छतु वाञ्छितं मे ॥५॥

त्रिपञ्चसङ्ख्याशततापसानां, तपःकृशानामपुनर्भवाय ।
अक्षीणलब्ध्या परमान्नदाता, स गौतमो यच्छतु वाञ्छितं मे ॥६॥

सदक्षिणं भोजनमेव देयं, साधर्मिकं सङ्घ-सपर्ययेति ।
कैवल्यवस्त्रं प्रददौ मुनीनां, स गौतमो यच्छतु वाञ्छितं मे ॥७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिवं गते भर्तरि वीरनाथे, युगप्रधानत्वमिहैव मत्वा ।
पट्टाभिषेको विदधे सुरेन्द्रैः, स गौतमो यच्छतु वाञ्छितं मे ॥८॥

त्रैलोक्यबीजं परमेष्ठिबीजं, सद्ज्ञानबीजं जिनराजबीजं ।
यन्नाम चोक्तं विदधाति सिद्धिं, स गौतमो यच्छतु वाञ्छितं मे ॥९॥

श्रीगौतमस्याष्टकमादरेण, प्रबोधकाले मुनिपुङ्गवा ये ।
पठन्ति ते सूरिपदं सदैवानन्दं लभन्ते सुतरां क्रमेण ॥१०॥

પ્રભુ ! આપનું સંયમ જીવન પામ્યા પછી
કોઈ ફળ મને મળવાનું હોય તો
મને...આપના જેવી અપ્રમત્ત દશા આપજો.
આપના જેવી જાગૃતિ, નિષ્કષાયભાવ આપજો.
આપના જેવી વિશુદ્ધિ અને નિર્મળતા આપજો
આપના જેવું સંકલ્પબળ, સમાધિ અને
સમતા આપજો
આપના જેવો સર્વજીવ પ્રત્યેનો
આદર + કરૂણાભાવ આપજો.


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ सिरि गोयम थवो ॥

जय सिरिविलासभवणं, वीरजिणिंदस्स पढम सीसवरं ।
सयलगुणलद्धिजलहिं, सिरि गोयमगणहरं वंदे ॥१॥

ॐ सह नमो भगवओ, जगगुरुणो गोयमस्स सिद्धस्स ।
बुद्धस्स, पारगस्स य, अक्खीणमहाणसस्स सया ॥२॥

अवतर अवतर भगवन्, मम हृदये भास्करीश्रियं बिभृहि ।
ॐ ह्रीं श्रीं ज्ञानादि, वितरतु तुभ्यं नमः स्वाहा ॥३॥

वसइ तुह नाममंतो, जस्स मणे सयलचिंतियं दिंतो ।
चिंतामणि-सुरपायव-कामघडाइहिं पि किं तस्स ॥४॥

सिरि गोयम गणनायग, तिहुअणजणसरण, दुरियदुहहरण ।
भवतारण रिउवारण, होसु अणाहस्स मह नाहो ॥५॥

मेरुसिरे सिंहासण, कणयमहाकमलसहस्सपत्तड्डियं ।
सूरिगणभगणविसयं, ससिप्पहं गोयमं वंदे ॥६॥

सव्वसुहलद्धिदाया, सुमरिअमित्तो वि गोयमं भयवं ।
पइड्डियगणहरमंतो, दिज्ज मह वंछियं सयलं ॥७॥

इअ सिरि-गोयम-संथुअ-मुणिसुंदरसूरि थुइपयं मएवि तुम्हं ।
देहि मह सिद्धि सिवफलयं, भुवणकप्पतरुवरस्स ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री गोतमस्वामी छन्द

पेलो गणधर वीरनो रे, शासननो शणगार,
गौतम गोत्र तणो धणी रे, गुणगणी रयणभंडार,
जयंकर जीवो गौतम स्वाम.
ए तो नवनिधि होय जस नाम,
ए तो पुरे वाञ्छित ठाम,
ए तो गुणमणि केरो धाम
जयंकर जीवो गौतम स्वाम ॥१॥

ज्येष्ठा नक्षत्रे जनमिया रे, गोबर गाम मोझार,
वसुभूतिसुत पृथ्वी तणो रे, मानव मोहनगार.
जयंकर जीवो गौतम स्वाम ॥२॥

समवसरण इन्द्रे रच्युं रे, बेठां श्री वर्धमान,
बेठी ते बारे परषदा रे, सुणे रे श्री जिनवाण.
जयंकर जीवो गौतम स्वाम ॥३॥

वीर कन्हे संजम लह्युं रे, पंचसयां परिवार,
छठ छठ तपने पारणे रे, करतां उग्र विहार.
जयंकर जीवो गौतम स्वाम ॥४॥

अष्टापद लब्धिए चड्या रे, वांद्या जिन चोवीश,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जग चिंतामणी तिहां कर्युं रे, स्तविया श्री जगदीश.
जयंकर जीवो गौतम स्वाम ॥५॥

पनरसें तापस पारणे रे, खीर खांडघृत भरपुर,
अमिय जास अंगूठडे रे, उग्यो ते केवलसूर.
जयंकर जीवो गौतम स्वाम ॥६॥

दिवाळी दिने उपन्युं रे, प्रभाते केवल नाण,
अक्षय लब्धि तणा धणी रे, नामे ते सफळ विहाण.
जयंकर जीवो गौतम स्वाम ॥७॥

पचास वरस घरवासमां रे, छद्मस्थाए त्रीश,
बार वरस लगे केवळी रे, बाणुं रे आयु जगीश.
जयंकर जीवो गौतम स्वाम ॥८॥

गौतम गणधर वंदिया रे, श्री विजयसेनसूरीश,
ए गुरुचरण पसाउल रे, धीर नामे निशदिश.
जयंकर जीवो गौतम स्वाम ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुभूतसिद्धसारस्वतस्तोत्र

कलमरालविहंगमवाहना, सितदुकूलविभूषणलेपना ।
प्रणतभूमिरुहामृतसारिणी, प्रवरदेहविभाभरधारिणी ॥१॥
अमृतपूर्णकमण्डलुहारिणी, त्रिदशदानवमानवसेविता ।
भगवती परमैव सरस्वती, मम पुनातु सदा नयनाम्बुजम् ॥२॥
जिनपतिप्रथिताखिलवाङ्मयी, गणधराऽऽननमण्डपनर्तकी ।
गुरुमुखाम्बुजखेलनहंसिका, विजयते जगति श्रुतदेवता ॥३॥
अमृतदीधितिबिम्बसमाननां, त्रिजगतीजननिर्मितमाननाम्
नवरसामृतवीचिसरस्वतीम्, प्रमुदितः प्रणमामि सरस्वतीम् ॥४॥
विततकेतकपत्रविलोचने ! विहितसंसृतिदुष्कृतमोचने ! ।
धवलपक्षविहङ्गमलाञ्छिते, जय सरस्वति ! पूरितवाञ्छिते ॥५॥
भवदनुग्रहलेशतरङ्गितास्तदुचितं प्रवदंति विपश्चितः ।
नृपसभासु यतः कमलाबला, कुचकलाललनानि वितन्वते ॥६॥
गतधना अपि हि त्वदनुग्रहात्, कलितकोमलवाक्यसुधोर्मयः ।
चकितबालकुरङ्गविलोचना, जनमनांसि हरन्तितरां नराः ॥७॥
करसरोरुहखेलनचञ्चला, तव विभाति वरा जपमालिका ।
श्रुतपयोनिधिमध्यविकस्वरो-ज्ज्वलतरङ्गकलाग्रहसाग्रहा ॥८॥
द्विरद-केसरिमारि-भुजङ्गमाऽसहनतस्करराजरुजां भयम् ।
तव गुणावलिगानतरङ्गिणां, न भविनां भवति श्रुतदेवते ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ ह्रीँ क्लीँ ब्लीँ ततः श्रीँ तदनु, ह् स् क् ल् ह्रीँ अथ ऐँ नमोऽन्ते ।
लक्षं साक्षाज्जपेद्यः करसमविधिना सत्तपा ब्रह्मचारी
निर्यान्तीं चन्द्रबिम्बात् कलयति मनसा त्वां जगच्चन्द्रिकाभां
सोऽत्यर्थं वह्निकुण्डे विहितघृतहुतिः स्याद् दशांशेन विद्वान् ॥१०॥

रे रे लक्षणकाव्यनाटक-कथा चम्पूसमालोकने
क्वायासं वितनोषि बालिश ! मुधा किं नम्रवक्त्राम्बुजः ।
भक्त्याऽऽराधय मन्त्रराजमहसाऽनेनानिशं भारतीं
येन त्वं कविताविताનसविताऽद्वैतप्रबुद्धायसे ॥११॥

चञ्चवच्चन्द्रमुखी प्रसिद्धमहिमा स्वाच्छंद्यराज्यप्रदा,
नायासेन सुरासुरेश्वरगणैरभ्यर्चिता भक्तितः ।
देवी संस्तुतवैभवा मलयजा लेपाङ्गरङ्गद्युति
सा मां पातु सरस्वती भगवती त्रैलोक्यसंजीवनी ॥१२॥

स्तवनमेतदनेकगुणान्वितं, पठति यो भविकः प्रमनाः प्रगे ।
स सहसा मधुरैर्वचनामृतैर्नृपगणानपि रंजयति स्फुटम् ॥१३॥

★

मंत्रं संसारसारं त्रिजगदनुपमं सर्वपापारिमंत्रं,
संसारोच्छेदमंत्रं विषमविषहरं कर्मनिर्मूलमंत्रं ।
मंत्रं सिद्धिप्रदानं शिवसुखजननं केवलज्ञानमंत्रं,
मंत्रं श्रीजैनमंत्रं जप जप जपितं जन्म निर्वाणमंत्रं ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री सरस्वती नाम स्तोत्र

चन्द्रार्क-कोटि घटितोज्वल-दिव्य-मूर्ते !
श्री चन्द्रिका-कलित-निर्मल-शुभ्रवस्त्रे !
कामार्थ-दायि-कलहंस-समाधि-रूढे !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥१॥

देवा-सुरेन्द्र-नत मौलि मणि-प्ररोचि,
श्री मंजरी-निविड-रंजित-पादपद्मे !
नीलालके ! प्रमदहस्ति - समानयाने !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥२॥

केयूर हार - मणि कुण्डल - मुद्रिकाद्यैः,
सर्वाङ्ग भूषण-नरेन्द्र-मुनीन्द्र-वंद्ये !
नानासुरत्न - वर - निर्मल - मौलियुक्ते !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥३॥

मंजीर कोत्कनक कंकण किंकणीनां,
कांच्याश्च झंकृत - रवेण विराजमाने !
सद्धर्म - वारिनिधि-संतति-वर्द्धमाने !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंकेलि पल्लव - विनिंदित पाणियुग्मे !
पद्मासने दिवस - पद्मसमान - वक्त्रे !
जैनेन्द्र-वक्त्र-भवदिव्य-समस्त-भाषे !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥५॥

अर्द्धेन्दु-मण्डित जटा-ललित-स्वरूप !
शास्त्र-प्रकाशिनि-समस्त-कलाधिनाथे !
चिन्मुद्रिका-जपसराभय-पुस्तकांके !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥६॥

डिंडीरपिंड-हिमशंखसिताभ्रहारे !
पूर्णेन्दु - बिम्बरुचि-शोभित-दिव्यगात्रे !
चांचल्यमान - मृगशाव ललाट-नेत्रे !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥७॥

पूज्ये पवित्र करणोन्नत - कामरूपे !
नित्यं फणीन्द्र - गरुड़ाधिप-किन्नरेन्द्रैः,
विद्याधरेन्द्र-सुरयक्ष-समस्त-वृन्दैः !
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ॥८॥

सरस्वत्या प्रसादेन, काव्यं कुर्वन्ति मानवाः ।
तस्मान्निश्चल- भावेन, पूजनीया सरस्वती ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीसर्वज्ञ-मुखोत्पन्ना, भारती बहुभाषिणी ।
अज्ञानतिमिरं हन्ति, विद्या-बहुविकासिनी ॥१०॥

सरस्वती मया दृष्टा, दिव्या कमललोचना ।
हंसस्कंध-समारूढ़ा, वीणा-पुस्तक-धारिणी ॥११॥

प्रथमं भारती नाम, द्वितीयं च सरस्वती ।
तृतीयं शारदादेवी, चतुर्थं हंसगामिनी ॥१२॥

पंचमं विदुषां माता, षष्ठं वागीश्वरी तथा ।
कुमारी सप्तमं प्रोक्तं, अष्टं ब्रह्मचारिणी ॥१३॥

नवमं च जगन्माता, दशमं ब्राह्मिनी तथा ।
एकादशं तु ब्रह्माणी, द्वादशं वरदा भवेत् ॥१४॥

वाणी त्रयोदशं नाम, भाषा चैव चतुर्दशं ।
पंचदशं श्रुतदेवी, षोडशं गौर्निगद्यते ॥१५॥

एतानि श्रुतनामानि, प्रातरुत्थाय यः पठेत् ।
तस्य संतुष्यति माता, शारदा वरदा भवेत् ॥१६॥

सरस्वती ! नमस्तुभ्यं, वरदे ! कामरूपिणि ! ।
विद्यारंभं करिष्यामि, सिद्धिर्भवतु मे सदा ॥१७॥

॥ इति श्री सरस्वती नाम स्तोत्रम् ॥

• • •



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री सूरिमन्त्रस्तोत्र

जयश्रियं श्रीजिनशासनस्य कलिद्विषोत्थापितविघ्नहर्ता ।
परां यएवातनुतेऽधुनापि श्री सूरिमन्त्रं प्रयतः स्तुवे तम् ॥१॥

त्वं तीर्थकृत् त्वं परमं च तीर्थं त्वं गौतमस्त्वं गणभृत् सुधर्मा ।
त्वं विश्वनेता त्वमसीहितानां निधिः सुखानामिह मन्त्रराज ! ॥२॥

किं कामधेनुः सुरपादपो वा किं कामकुम्भः सुमनोमणिर्वा ।
यदि प्रसन्नः सकलेष्टदायी श्रीसूरिमन्त्रोऽपि जगत्पतिस्त्वम् ॥३॥

त्वयि स्थिते चेतसि के नु विघ्नाः के दुर्जनाः के प्रतिपक्षभूपाः ।
के वैरिणः के दुरुपद्रवाश्च स्वामिन् ! समग्रं हि सुखाकृदेव ॥४॥

न लब्ध्यः काश्चन ते प्रभावात् त्वयि प्रभौ भक्तिभृतां दुरापाः ।
सदा सुखानन्दितचेतसो यत् खेलन्ति ते श्रीमहिमप्रभाभिः ॥५॥

प्रवर्तते तीर्थमिदं जिनस्य जयद् यदा दुःप्रसहं कुदृष्टेः ।
यदागमो यद्विजयी च धर्मस्तदत्र हेतुर्भगवँस्त्वमेव ॥६॥

श्री वर्धमानस्य निदेशतस्त्वं प्रतिष्ठितो गौतमगच्छनेत्रा ।
सिद्धीः समग्राः शिवसम्पदश्च सर्वोग्रपुण्यौघफलानि दत्से ॥७॥

इति महामुनिसुन्दरसंस्तवास्पद गणेश्वरमन्त्रपते मया ।
महिमवारिनिधे स्तुत भक्तितो वितर मेऽर्थितसर्वसुखश्रियः ॥८॥

॥ इति श्री सूरिमन्त्रस्तोत्र सम्पूर्णम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सरस्वती - अष्टक

आराद्धा श्रद्धया सम्यग्ज्ञानादिविजयश्रियम् ।
ददती जगतां मातर्जय भारति देवते ॥१॥

चतुर्वरदवीणाक्षसूत्रपुस्तकभृद्भुजे ।
मरालवाहने शक्रक्रियमाणा श्रमस्तवे ॥२॥

आद्ये श्रीसूरिमन्त्रस्य विद्यापीठे पदे स्थिते ।
श्रीमद्गौतमपादाब्जपरिचर्यामरालिके ॥३॥

श्रीजिनेन्द्रमुखाम्भोजविलासवसते सदा ।
जिनागमसुधाम्भोधिमध्यासिनि विधुद्युते ॥४॥

कविहृत्कमलाक्रीडप्रबोधतरणिप्रभे ।
प्रसीद भगवत्याशु देहि भारति मेऽर्थितम् ॥५॥

ऐं नमः प्रमुखैर्मन्त्रैराराध्ये विश्वदेवते ।
मरुन्मणिलताजैत्रप्रभावसुभगे जय ॥६॥

आराध्या दर्शनैः सर्वैः, सकलाभीष्टदायिनी ।
रातु बोधिं विशुद्धं, मे, वाग्देवि जिनभक्तिभृत् ॥७॥

स्तूयमाने महानेकमुनिसुंदरसंस्तवैः ।
स्तुते मयापि मे देहि प्रार्थितं श्रीसरस्वति ॥८॥

इति श्रीसूरिमन्त्रैप्रथमपीठाधिष्ठायिका श्रीभारतीस्तोत्र ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री त्रिभुवनस्वामिनी देवी स्तोत्र

जय श्रीगणभृन्मन्त्रविद्यास्थानप्रतिष्ठिते ।
देवि त्रिभुवनस्वामिन्यनन्तमहिमद्युते ॥१॥

जिनराजपदाम्भोजविलासवरलानिभे ।
गौतमस्वामिपद्भक्ते सक्ते भक्तालिपालने ॥२॥

महापराक्रमोल्लासि सहस्त्रभुजराजिते ।
मानुषोत्तरशैलेन्द्रनिवासिनि जयोत्तमे ॥३॥

महादेवि सूरिवृन्दवन्द्यमानक्रमाम्बुजे ।
सुरासुरनराधीशप्रशस्यगुणवैभवे ॥४॥

शाकिनी-डाकिनी-भूत-प्रेतादिग्रहनाशिनि ।
सर्वद्वेषिगणोच्चाटन्यमेयबलशालिनि ॥५॥

नृतिर्यक्देवताद्युत्थक्षुद्रोपद्रववारिणि ।
संस्मृतेरपि सर्वेष्टसुखकल्याणकारिणि ॥६॥

सर्वसूरिगुणस्तुत्ये द्विध( धा )वैरिजयश्रियम् ।
देहि मे शुद्धबोधिं च समाधानं च सर्वतः ॥७॥

स्तूयमाने महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयापि मेऽभीष्टं देहि त्रिभुवनेश्वरि ॥८॥

इति श्री सूरिमन्त्रस्य विद्याभिधानद्वितीयपीठाधिष्ठात्र्याः श्रीत्रिभुवनस्वामिनीदेवी स्तुतिः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री श्रीदेवी स्तोत्र

सुरराजैः चतुःषष्ठ्या, स्तूयमानगुणप्रभे ।
जय श्रीदेवि विश्वैकमातराश्रितवत्सले ॥१॥
हिमवच्छिखरे पद्महृदपद्मनिवासिनि ।
गौतमक्रमसेवैकरसिके विश्वमोहिनि ॥२॥
सूरिमन्त्रतृतीयोपविद्यापदनिवेशिते ।
सूरिराजहृदम्भोजविलासिनि चतुर्भुजे ॥३॥
श्रीचन्द्रप्रभभक्त्याऽतिपूते पद्माननेक्षणे ।
पद्महस्ते महारत्ननिधिराजिविराजिते ॥४॥
गजयानेऽप्सरः श्रेणिगीतनाट्यादिरञ्जिते ।
सदाशिरोधृतछत्रचलच्चामरभासिते ॥५॥
श्रीजैनशासनानन्तमहिमाम्बुधिचन्द्रिके ।
नानामन्त्रैः समाराध्ये सुरासुरनरर्षिभिः ॥६॥
विजया-जया-जयन्ती-नन्दा-भद्राद्युपासिते ।
स्मृतिस्तवनपूजाभिः सर्वविघ्नभयापहे ॥७॥
विश्वकल्पलते लक्ष्मि सर्वालङ्कृत्यलङ्कृते ।
शुद्धबोधिसमाधानसर्वसिद्धीः प्रयच्छ मे ॥८॥
स्तूयमाने महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयापि सर्वेष्टसिद्धिं श्रीदेवि देहि मे ॥९॥

इति श्रीसूरिमन्त्रतृतीयपीठाधिष्ठात्र्याःश्रीलक्ष्मीमहादेव्याः स्तुतिः॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री यक्षराजगणिपिटक स्तोत्र

श्रीमन्त्रपीठनाम्नि प्रतिष्ठितं सूरिमन्त्रतुर्यपदे ।
गणिपिटकयक्षराजं सर्वारिजयश्रिये नौमि ॥१॥
अनपङ्गप्रज्ञप्तिश्रीमद्यक्षाधिपोऽतिजिनभक्तः ।
श्रीगौतमपदसेवानिरतस्तद्भक्तविघ्नहरः ॥२॥
शर-चाप-खड्ग-खेटकामुख्यास्त्रैः विश्वरक्षणप्रभुभिः ।
वरदाभयैश्च हस्तैर्विंशत्या भ्राजमानाङ्गः ॥३॥
षोडशयक्षसहस्त्रप्रभुर्जगज्जैत्रविक्रमो रिपुहा ।
सर्वाश्रितेष्टदानं( ने )प्रगल्भमहिमाम्बुधिर्जयातात् ॥४॥
( त्रिभिर्विशेषकम् )

जिनशासनविद्वेषिव्रातकृताशेषविघ्नतिमिररविः ।
सुविहितगुरुगुणसङ्घाऽनवरतरक्षाभियुक्ततमः ॥५॥
गणधरमन्त्राराधकसूरिवरप्रार्थितार्थकल्पद्रुः ।
सर्वक्षुद्रोपद्रवहरणोद्युक्तः सकलसङ्घे ॥६॥
स्मृतिपूजास्तवनाद्यैः संनिहितोऽस्यवहितश्च यक्षेश ।
श्रीगणिपिटक ! सुरोत्तम ! विघ्नहृतेर्देहि मे तुष्टिं ॥७॥
स्तूयमानमहानेकमुनिसुन्दरसंस्तवैः ।
इति मे स्तुवतो भूयात् यक्षेश सकलेष्टकृत् ॥८॥

इति श्रीसूरिमन्त्रचतुर्थपीठाधिष्ठायकश्रीगणिपिटकयक्षाधिराजस्तुतिः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री पञ्चमपीठाधिष्ठायक स्तोत्र

पञ्चमे गणभृद्विद्यापीठे श्रीमन्त्रनायके ।
प्रतिष्ठितान् सुरेन्द्रादीन् स्तुवे द्वेषिजयश्रिये ॥१॥

सौधर्मेन्द्रादयः कल्पाधिपा मे द्वादशवाञ्छितम् ।
ददतां चमरेन्द्राद्या भवनेशाश्च विंशतिः ॥२॥

दद्युः कालमहाकालप्रमुखा व्यन्तरेश्वराः ।
श्रेयः संनिहिताद्याश्च मम षोडश षोडश ॥३॥

ज्योतिश्चक्राधिपाश्चंद्रसूर्याः सर्वग्रहान्विताः ।
रोहिण्याद्यास्तथा विद्यादेव्यः षोडश पान्तु माम् ॥४॥

गोमुखप्रमुखा यक्षाः पान्तु शासनरक्षकाः ।
चक्रेश्वर्यादिदेव्यश्च मां चतुर्विंशतिः सदा ॥५॥

सुराः संनिहिताः सर्वे सुर्यश्चेद्धप्रभावभाः ।
रेवतीरोहिणीनागार्जुनार्यखपुटादयः ॥६॥

यशोभद्रादयश्चापि सूरयो महिमार्णवाः ।
सिद्धश्रीसूरिमन्त्रा मे रान्तु विघ्नहृतोऽर्थितं ॥७॥

इति स्तुतगुणाः श्रीमन्मन्त्रराजप्रतिष्ठिताः ।
देवता ददतामिष्टं मुनिसुन्दरसूरये ॥८॥

॥ इति श्रीगणधरमन्त्रपञ्चमपीठश्रीमन्त्रराजाधिष्ठायकस्तुतिः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री चक्रेश्वरीदेवी स्तोत्र

जय श्रीमद्युगादीशपदपद्ममधुव्रते ।
सुरेन्द्रादिसुरश्रेणिश्लाघ्यसद्‌गुणविक्रमे ॥१॥

जय श्रीदेवदेवेन्द्रप्रशस्यगुणविक्रमे ।
श्रीयुगादिजगन्नाथक्रमाम्भोजमधुव्रते ॥२॥

चक्रवित्रासिताशेषरिपुचक्रपराक्रमे ।
चक्रेश्वरी सूरिवृन्दवन्द्यमानक्रमाम्बुजे ॥३॥

तीर्थप्रवृत्तिहेतुश्रीसूरिमन्त्रस्य पञ्चमे ।
मन्त्रराजाभिधे स्थाने सुप्रतिष्ठे महाबले ॥४॥

वरदेष्वरिपाशांकितापसव्यचतुर्भुजे ।
सत्त्वाह्लादिनी हे चक्रांकुशसव्यचतुःशये ॥५॥

सुपर्णवाहने श्रीमद्‌गौतमोपास्तिलालसे ।
स्वर्णवर्णे सदोद्भासिसारालङ्काररराजिते ॥६॥

सूरिभिः सततं ध्येये तेषामिष्टप्रसाधिके ।
सर्वविघ्नावलीघातनिघ्ने रक्षापरे सदा ॥७॥

चतुर्विधस्य संघस्य सर्वोपद्रवनाशिनि ।
समाधानं सुबोधिं च सदा देहीष्टदे मम ॥८॥

स्तूयमानमहानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयाप्यभीष्टाप्तिं चक्रेश्वरी विधेहि मे ॥९॥

॥ इति चक्रेश्वरी देवी स्तोत्रम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री चक्रेश्वरी स्तोत्र

श्री चक्रे चक्र भीमे ललित वर भुजे लीलया लालयन्ती,
चक्रं विद्युत्प्रकाशं ज्वलित शत शिश्वे खे खगेन्द्राधिरूढ़े ।
तत्त्वैरुद्भूत भासा सकल गुण निधे मन्त्र रूप स्वकान्ते
कोट्यादित्य प्रकाशे त्रिभुवन विदिते त्राहि मां देवि चक्रे ॥१॥

क्लीँ क्लीत्रें क्लिँ प्रक्रीले किलि-किलित खे दुंदुभिध्वाननादे,
आँ हुँ क्षुँ ह्लीँ सु चक्रे क्रमसि जगदिदं चक्र विक्रान्त कीर्तिः ।
क्षाँ आँ ऊँ भासयंति त्रिभुवन मखिलं सप्त तेजः प्रकाशे
क्षाँ क्षीँ क्षूँ विस्फुरन्ति प्रबल बल युते त्राहि मां देवि चक्रे ॥२॥

श्रूँ झ्रौँ द्रूँ प्रूँ प्रसिद्धे सुजन जन पदानां सदा कामधेनुः,
गूँ क्ष्मीँ श्रीँ कीर्ति बुद्धि प्रथयति वरदे त्वं महा मन्त्र मूर्ते ।
त्रैलोक्यं क्षोभयंति कुरु कुरु हरहं नीर नाद प्रघोषे
क्लीँ क्लिँ ह्लीँ द्रावयन्ती द्रुत कनक निभे त्राहि मां देवि चक्रे ॥३॥

ॐ क्षुँ द्राँ ह्लीँ सुबीजैः प्रवर गुण धरै मोँहिनी शोषणी त्वं,
शैले-शैले नटन्ती विजय जयकरी रौद्र मूर्ते त्रि नेत्रे ।
वज्र क्रोधे सुभीमे रहसि करतले भ्रामयन्ति सुचक्रं
रूँ रूँ राँ हः कराले भगवति वरदे त्राहि मां देवि चक्रे ॥४॥

ॐ ह्लीँ हुँ हुँ सुहर्षे ह ह ह ह हिम कुन्देन्दु संकाश बीजैः,
ह्राँ ह्रीँ ह्रूँ क्षः सुवर्णैः कुवलय नयने द्विद्रुमां द्रावयन्ती ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हूँ ह्रौं हृः क्ष स्त्रिलोकी ममृत जलधरा वारुणैः प्लावयन्ती
झ्राँ झ्राँ हूँ सः सुबीजैः प्रबल बल भया त्राहि मां देवि चक्रे ॥५॥

आँ क्रों ह्रीं क्षुयुताँगे प्रलय दिन करास्तस्य कोटि प्रकाशे,
अष्टौ चक्राणि धृत्वा विमलः निज भुजैः पद्ममेकं फलं च ।
द्वाभ्यां चक्र करालं निशित चल शिखं ताक्ष्यं रूढ़ा प्रचण्डा
ह्राँ ह्रीं ह्रौं क्षोभकारी र र र र रमणे त्राहि मां देवि चक्रे ॥६॥

स्त्रूं क्षुँ हुँ क्षुँ विचित्रे त्रिनयन नयने नाद बिन्दूग्र नेत्रे,
चँ चँ चँ वज्र धारा ल ल ल ल ललिते नील केशालि केशे ।
चँ चँ चँ चक्र धारा चल चल चलिते नूपुरै लेलि लीले ।
श्रीं स्त्रूं ह्राँ ह्रीं सुकीर्तिः सुरवर नमिते त्राहि मां देवि चक्रे ॥७॥

ॐ ह्रीं फट्कार मन्त्रे हृदय मुपगते रुंधि वश्याधिकारे,
ह्राँ ह्रीं क्लीं क्लिं सुघोषे प्रलय घन घटा टोप शब्द प्रनादे ।
वाँ फाँ क्रोध मूर्ते धगधगित शिखे ज्वालिनि ज्वाल माले
रौद्रे हुँ कार रूपे प्रकटित दर्शने त्राहि मां देवि चक्रे ॥८॥

• • •


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री पद्मावती स्तोत्र

ॐ नमोऽनेकांतदुर्वारमतसद्वंशमानवे ।
जिनाय सकलाभिष्टदायिने, कामधेनवे ॥१॥

स्वस्ति श्री जिनराजमार्गकमले प्रद्योतसूर्यप्रभे ।
स्वस्ति श्री फणिनायिके !, सुरनराराध्ये जगन्मंगले ।
स्वस्ति श्री कनकाद्रिसन्निभमहासिंहासनालंकृते ।
विद्यानामधिदेवते !, प्रतिदिनं मां रक्ष पद्माम्बिके ॥२॥

जय जय जगदम्बे ! मत्तकुंभे ! नितम्बे !
हर हर दुरितं मे स्वस्ति मानाभिरामे ।
नय नय जिनमार्गे, दुष्टघोरोपसर्गे,
भव भव शरणं मे, रक्ष मां देवि पद्मे ॥३॥

ॐ ह्रीँ बीजं प्रणवोपेतं, नमः स्वाहांतसंयुतम् ।
देदीप्यमानं हृत्पद्मे, ध्यायेऽभीष्टफलप्रदम् ॥४॥

तद् बीजं देवताकारं, पंचानां कवचान्वितम् ।
गुरूपदेशतो ध्यायेत् पापदारिद्रभंजनम् ॥५॥

ॐ नमस्तेऽस्तु महादेवी कल्याणी भुवनेश्वरी ।
चण्डी कात्यायनी गौरी, जिनधर्मपरायणी ॥६॥

पञ्चब्रह्मपदाराध्या, पञ्चमन्त्रोपदेशिनी ।
पञ्चव्रतगुणोपेता, पञ्चकल्याणदर्शनी ॥७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नम श्री स्तोतला नित्या, त्रिपुरा काम्यसाधिनी ।
मदोन्मालिनी विद्या महालक्ष्मी सरस्वती ॥८॥
सारस्वतगणाधीशा सर्वशास्त्रोपदेशिनी ।
सर्वेश्वरी महादुर्गा त्रिनेत्री फणिशेखरी ॥९॥
जटाबालेंदुमुगुटा कुर्कटोरगवाहिनी ।
चतुर्मुखी महायशा, धनदेवी गुह्येश्वरी ॥१०॥
नागराजमहापत्नी, नागिनी नागदेवता ।
नमः सिद्धान्तसम्पन्ना द्वादशांगपरायणी ॥११॥
चतुर्दश महाविद्या, अवधिज्ञानलोचना ।
वासंती वनदेवी च वनमाला महेश्वरी ॥१२॥
महाघोरा महारौद्रा, वीतभीताऽभयंकरी ।
कंकाली कालरात्री च, गंगा गांधर्वनायिकी ॥१३॥
सम्यग्दर्शनसम्पन्ना, सम्यग्ज्ञानपरायणी ।
सम्यग्चारित्रसम्पन्ना, नराणां उपकारिणी ॥१४॥
अगण्यपुण्यसम्पन्ना गणवी गणनायिकी ।
पातालवासिनी पद्मा, पद्मास्या पद्मलोचना ॥१५॥
प्रज्ञप्ति रोहिणी जम्भा, स्तम्भिनी मोहिनी जया ।
योगिनी योगविज्ञानी, मृत्युदारिद्र्यभंजिनी ॥१६॥
क्षमासम्पन्नधरणी, सर्वपापनिवारणी ।
ज्वालामुखी महाज्वालामालिनी वज्रशृंखला ॥१७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नागपाशधरा धौर्या श्रेणीताम्रफलान्विता ।
हस्ता प्रशस्ता विद्याऽऽर्या, हस्तिनी हस्तवाष्टगी ॥१८॥
वसंतलक्ष्मी गीर्वाणी, शर्वाणी पद्मविष्टरा ।
बालार्कवर्णशंकाशा, श्रृंगाररसनायिकी ॥१९॥
अनेकांतात्मतत्त्वज्ञा, चिन्तितार्थफलप्रदा ।
चिन्तामणिः कृपापूर्णा, पापारम्भविमोचिनी ॥२०॥
कल्पवल्लीसमाकारा, कामधेनु शुम्भकरी ।
सधर्मवत्सला सर्वा, सद्धर्मोत्सववर्धिनी ॥२१॥
सर्वपापोपशमनी, सर्वरोगनिवारिणी ।
गम्भीरा मोहिनी सिद्धा, शेफालितरुवासिनी ॥२२॥
अष्टोत्तरशतं स्तोत्ररत्ननामांकमालिकां ।
त्रिसंध्यं पठयेत् नित्यं, पापदारिद्यनाशनम् ॥२३॥
दिनाष्टकं त्रिसन्ध्यं यो ध्यानपूजाजपान्वितम् ।
नामांकमालिकास्तोत्रं, पठते स वाञ्छितं लभेत् ॥२४॥
दिव्यं स्तोत्रमिदं महासुखकरं चारोग्यसंपत्करं ।
भूत-प्रेत-पिशाच-दुष्टहरणं पापौघसंहारकम् ।
अन्येनार्पितवाञ्छितस्य निलयं सर्वापमृत्युंजयं ।
देव्या प्रीतिकरं कवित्वजनकं स्तोत्रं जगन्मङ्गलम् ॥२५॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री पद्मावती स्तोत्र

ॐ जयन्तीभमातङ्गी सर्वदुष्टक्षयंकरी ।
पद्मासने पद्मदेवी च महापद्मे नमोनमः ॥१॥
देवी त्वं ध्यायिता इन्द्रे पूजिता शिवसंकरे ।
कृष्णेन संस्तुता देवी-महापद्मे नमोनमः ॥२॥
सावित्रि पतिमाराध्य वासुकै सेविता भृशम् ।
तेषां संतुक्षते देवी महापद्मे नमोनमः ॥३॥
पद्माम्बरधरा देवी पद्मद्रहनिवासिनी !
पद्मायुधधरा नित्यं महापद्मे नमोनमः ॥४॥
यस्यां प्रसन्नतां पद्मे तस्यां दारिद्र्यनाशने ।
जय त्वं सुखदाता च महापद्मे नमोनमः ॥५॥
देवि ! दारिद्र्यदग्धाहं तन्मेसं संकरीभव ।
चिंतिता वरदाता च महापद्मे नमोनमः ॥६॥
पद्मावती यस्या गृहे पूजिता जगदीश्वरी ।
हृदये यस्य वर्तन्ते तस्य सौख्यं निरंतरम् ॥७॥
इदं स्तोत्रं पवित्रं च श्रीधराचार्यभाषितं ।
एकाग्रमनसा साध्यं तस्य सौख्यं निरन्तरम् ॥८॥
रणे राजकुले चैव दुर्ग्गमे शत्रुसंकटे ।
महावने महाभीमे विघ्नो यांति दिसो दिसा ॥९॥
अपुत्रो लभते पुत्रं धनार्थी लभते धनं ।
विद्यार्थी लभते विद्यां सुखार्थी लभते सुखं ॥१०॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री चन्द्रप्रभ विद्यास्तवः

ॐ चन्द्रप्रभ । प्रभाधीश । चन्द्रशेखरचन्द्रभूः । ( १ )
चन्द्रलक्ष्माङ्क । चन्द्राङ्ग । चन्द्रबीज । नमोस्तुते ॥१॥

ॐ ह्रीं श्रीं अर्हं श्रीं चन्द्रप्रभ ! ह्रीं श्रीं कुरु कुरु स्वाहा ।
इष्यसिद्धि-महासिद्धितुष्टिपुष्टिकरो भव ॥२॥

द्वादशसहस्त्रजप्तो वांछितार्थ फलप्रदः ।
महित्वा त्रिसंध्यं जापो, सर्वाधिव्याधिनाशनः ॥३॥

सुरासुरेन्द्रमहितः, श्री पांडवनृपस्तुतः ।
श्री चन्द्रप्रभतीर्थेशः, श्रियं चन्द्रोज्जवलां कुरु ॥४॥

श्री चन्द्रप्रभविद्येयं, स्मृता सद्यं फला मता ।
सर्वाधिव्याधिविध्वंसकारिणी मे वरप्रदा ॥५॥

श्री चन्द्रप्रभ विद्या-

ॐ ह्रीं श्रीं अर्हं चन्द्रप्रभ ह्रीं श्रीं कुरु कुरु स्वाहा ।

( सर्वकार्यमां साधक ज्वाला मालिनी मन्त्र )

ॐ ज्वालामालिनी क्षां क्षीं क्षूं क्षैं क्षौं क्षं क्षः हाः दुष्ट क्ष्मल्व्र्यूं ग्रहान् स्तंभय स्तंभय ठं ठं हां आं क्रौं क्षीं ज्वालामालिन्याज्ञापयति हुं फट् घे घे ।

• • •



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री ज्वालामालिनी देवी माला मन्त्रः

ॐ नमो भगवते चन्द्रप्रभ जिनेंद्राय शशाङ्क शंख, गोक्षीर, हार निहार, विमल, धवल गात्राय घाति कर्म निर्मूलनोच्छेदन कराय जाति जरा मरण शोक विनाशन कराय, संसार कांतारोन्मूलन कराय अचिंत्य बल पराक्रमाय, अप्रतिहत शासनाय, अप्रतिहत चक्राय, त्रैलोक्य वशं कराय, सर्व सत्व हितंकराय, भव्य लोक वशं कराय, सुरासुरोरगेंद्र मणि गण खचित मुकुट कोटी घटित पाद पीठाय, त्रैलोक्य महिताय, अष्टादश दोष रहिताय, धर्म चक्राधीश्वराय, सर्व विद्या परमेश्वराय कुविद्या अघ्नाय, चतुःस्त्रिंशदतिशय सहिताय, द्वादश गण परिवेष्टिताय शुक्लध्यान पवित्राय, अनंत ज्ञानाय, अनन्त दर्शनाय, अनन्त वीर्याय, अनन्त सुखाय, सर्वज्ञाय सिद्धाय, बुद्धाय, शिवाय, सत्यज्ञानाय, सत्य ब्रह्मणे, स्वयंभुवे, परमात्मने अच्युताय, दिव्यमूर्तये, प्रभामंडल-मंडिताय, कण्ठ ताल्वोष्ठ पुटव्यापार रहित तत्तदभिष्टं वस्तु कथकं निःशेष भाषा प्रतिपालकाय, देवेन्द्र धरणेन्द्र, चक्रवर्त्यादि शतेन्द्र वंदित पादारविंदाय, पंचकल्याण अष्टमहाप्रातिहार्यादि विभवालंकृताय, वज्रर्षभनाराचसंहनन चरम दिव्य देहाय, देवाधि देवाय, परमेश्वराय, तत्पाद पंकजाश्रयाय, निवेशिनि देवी शासन देवते त्रिभुवन जन संक्षोभिणी, त्रैलोक्यसंहार कारिणी, स्थावर-जंगम-कृत्रिम विषय विषसंहार कारिणि, सर्वाभिचार कर्मापहारिणि, पर विद्या छेदिनी, पर मंत्र प्रणाशिनी, अष्टमहानाग कुल उच्चाटिनी, काल दंष्ट्रमृद्कोत्था-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिनि, सर्व रोगापनोदिनी, ब्रह्माविष्णु-रुद्र-इंद्र चंद्र-आदित्यादि ग्रहनक्षत्र तारा लोकोत्पाद भय पीडा प्रमर्दिनी, त्रैलोक्य-महिते, भव्य लोकहितंकरी, विश्वलोक वंशकरि, महाभैरवी, भैवरूपधारिणी, भीमे भीमरूप धारिणी, रौद्रे महारौद्र रूप धारिणी, सिद्धे सिद्धरूपधारिणी, प्रसिद्ध सिद्ध विद्याधर, यक्ष, राक्षस, गरुड़, गंधर्व, किन्नर, किंपुरुष दैत्योरगेंद्र अमर पूजिते ज्वालामाला कराले तत्त दिगन्तराले, महामहिषवाहिनि, त्रिशूल चक्र, झष, पाश शर, शरासन, फलवरद प्रदान विराजमान, षोडषार्द्ध भुजे खेटक कृपाणहस्ते, त्रैलोक्या-कृत्रिमचैत्यालय निवासिनि, सर्व सत्वानुकम्पिनि, रत्नत्रय महानिधि, सौख्य, सौगत, चार्वाक, मीमांसक दिगंबरादि पूजिते विजयवर प्रदायिनि, भव्यजन संरक्षिणि, दुष्टजन प्रमर्दिनि, कमल श्री गृहित गर्वावलिप्त ब्रह्म राक्षस ग्रह अपहारिणि, शिवकोटी महाराज प्रतिष्ठित भीम लिंगोत्पाटन पटु प्रतापिनि, समस्तग्राहकर्षिणि, ग्रहानुच्छोदिनि, ग्रह कलामुखि नगर निवासिनि, पर्वतवासिनि, स्वयंभूरमणवासिनि, वज्र वेदिकाधिष्ठित व्यंतरावासवासिनि, मणिमय सूक्ष्म घंटनाद किंचिद्रणित नूपुरयुक्त पादारविंदे, वज्र, वैडूर्य, मुक्ताफल हरिन्मणि मयूख मालमण्डिल हेम किंकिणी झणत्कार विराजित कणकऋजुसूत्र भूषित नितम्बिनि, वारद नीरद निर्मलायमान सूक्ष्म दुकुल परीत दिव्य तनुमध्ये संध्यापरागारूण मेघ समान कौसुम्भ वस्त्र धारिणि वालार्करुक सन्निभायमान तपनीय वस्त्राच्छादिते, इन्द्रचंद्रकादि मौक्तिकहार विराजित स्तन मण्डले, तारा समूह परितोत्तमांगे, यमराज


Jain Education International For Private & Personal Use Only www.jainelibrary.org

लुलायमान महिषासुर मर्दन, दक्षभूत, महामहिष वाहिनि, ताराधर तारे नीहार पटीत पयः पूर कर्पूर शुभ्रायमान विवल धवल गात्रे, भय काल रुद्र रौद्रावलोकित, भालेनेत्रानल विस्फुलिंग समूह सन्निभ ज्वालावेष्टित दिव्य देहिनि, कुलशैल निर्भेदिनी, कृत सहस्त्र धारायुक्त महाप्रभा मण्डल मण्डित, कृपाणि भ्राज दोर्दण्डे देवि, ज्वालामालिनि अत्र एहि २, पिण्ड रूपे एहि २, नव तत्त्व देहिनि, महामहित मेखला कलित प्रतापे ऐहि २, संसार प्रमर्दिनि ऐहि २, महामहिषवाहने एहि २, कटक कटिसूत्र कुण्डलाभरण भूषिते एहि २, घनस्तनिं किंकिणि नुपूरनादे एहि २, महामहित मेखला सूत्रे एहि २, गरुड गंधर्व देवासुर समिति पूजित पादपंकजे एहि २ भव्यजन संरक्षिणि एहि २, महादुष्ट प्रमर्दिनि एहि २, मम ग्रहाकर्षिणी एहि २, ग्रहानुबंधिनी एहि २, ग्रहानुच्छेदिनि एहि २, ग्रहकाल मुखि एहि २, ग्रहोच्चाटनि एहि २, ग्रहमारिणि एहि २, मोहिनि एहि २, स्तंभिनि एहि २, समुद्रधारिणी एहि २, धनु २ कम्प २, कम्पावय २, मंडल मध्ये प्रवेशय २, स्तम्भय २, ॐ -हाँ -ह्रीँ -हूँ -हाँ -हः आह्वानन, जलं गृहाण २, गंधं गृहाण २, अक्षतं गृहाण २, पुष्पं गृहाण २, चरुं गृहाण २, धूपं गृहाण २, दीपं गृहाण २, फलं गृहाण २, अर्घ्यं गृहाण २, ॐ हम्ल्व्यूँ महादेवि ज्वालामालिनि -ह्रीँ क्लीँ ब्लूँ द्राँ द्रीँ-हाँ-ह्रीँ-हूँ-ह्रौं -हः देव ग्रहान् आकर्षय २, ब्रह्मा विष्णु रुद्रेन्द्रादित्य ग्रहान् आकर्षय २, नाग ग्रहान् आकर्षय २, यक्ष ग्रहान् आकर्षय २, गंधर्व ग्रहान् आकर्षय २, ब्रह्मराक्षस ग्रहान् आकर्षय २, भूत् ग्रहान् आकर्षय २, व्यंतर ग्रहान् आकर्षय २, सर्व दुष्ट ग्रहान् आकर्षय २,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शतकोटी देवतान् आकर्षय २ सहस्त्रकोटी पिशाच देवतान् आकर्षय २, कालराक्षस ग्रहान् आकर्षय २, प्रेतासिनि ग्रहान् आकर्षय २, वैतालो ग्रहान् आकर्षय २, क्षेत्रवासी ग्रहान् आकर्षय २, हन्तुकाम ग्रहान् आकर्षय २, अपस्मार ग्रहान् आकर्षय २, क्षेत्रपाल ग्रहान् आकर्षय २, भैरव ग्रहान् आकर्षय २, ग्रामादि देवतान् आकर्षय २, गृहादि देवतान् आकर्षय २, कुलादि देवतान् आकर्षय २, चंडिकादि देवतान् आकर्षय २, शाकिनि ग्रहान् आकर्षय २, डाकिनि ग्रहान् आकर्षय २, सर्वयोगिनी ग्रहान् आकर्षय २, रणभूत ग्रहान् आकर्षय २, रज्जूनि ग्रहान् आकर्षय २, जल ग्रहान् आकर्षय २, अग्नि ग्रहान् आकर्षय २, मूक ग्रहान् आकर्षय २, मूर्ख ग्रहान् आकर्षय २, छ्ल ग्रहान् आकर्षय २, चोरचिंता ग्रहान् आकर्षय २, भूत ग्रहान् आकर्षय २, शक्ति ग्रहान् आकर्षय २, मातंग ग्रहान् आकर्षय २, चांडाली ग्रहान् आकर्षय २, ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, भव, भवान्तर, स्नेह वैर, बंध सर्व दृष्ट ग्रहान् आकर्षय २, कम्प २, मृत्योरक्षय २, ज्वरं भक्षय २, अनलविषं हर २, कुमारी रक्ष २, योगिनि भक्षय २, शाकिनि मर्दय २, डाकिनी मर्दय २, पूतनी कम्पय २, राक्षसी छेदय २, कोलिका मुद्रा दर्शय २, सर्व कार्यकारिणी, सर्व ज्वर मर्दिनी, सर्वशिक्षा जनप्रतिपादिनी एहि २, भगवती ज्वालामालिनी एकाह्निकं, द्वयाह्निकं, त्र्याह्निकं, चातुर्थिकं, वात्तिकं श्लेष्मिकं पैत्तिकं २, सन्निपातिकं (वेला), ज्वरादिकं पात्रे प्रवेशय २, ज्वलिज्वलि ज्वालय २, मुंच २, मुंचावय २, शिरं मुच २, मुखं मुंच २, ललाटं मुंच २, कंठं मुंच २, बाहुं मुंच २, हृदयं मुंच २,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कटिं मुंच २, जानुं मुंच २, पादं मुंच २, आच्छेदय २, क्रों भेदय २, -हीं मर्दय २, क्षीं बोधय बोधय हम्ल्र्व्र्यूं घूर्मय २, र र र र र र रां रां सं घं पातय २, पर मंत्रान् स्फोटय २, ॐ -हाँ -हीँ -हूँ-हौँ -हः घे घे फट् स्वाहा, अस्मिन् दलमध्ये प्रवेशय २, पात्रं गृहाण २, आवेशय २, ग्रासय २, पूरय २, खण्ड २, कंप २, कंपावय २, ग्राह्य २, शीर्षं चालय २, भालं चालय २, नेत्रं चालय २, वदनं चालय २, कण्ठं चालय २, बाहूं चालय २, हस्तं चालय २, हृदयं चालय २, ग्रात्रं चालय २, सर्वांगं चालय २, लोलय २, कंप २, कम्पावय २, शीघ्रं अवतर २, गृहाण २, चालय २, आवेशय २, ॐ क्षम्ल्व्यूँ ज्वालामालिनी -ह्रीँ क्लीं, ब्लूं, द्राँ, द्रीँ, क्षाँ क्षीँ, क्षूँ क्षौँ क्षः ह्ळः सर्व दुष्ट ग्रहान् स्तंभय २, पूर्वं बंधय २, दक्षिणं बंधय २, पश्चिमं बंधय २, उत्तरं बंधय २, ठः ठः ह्लँ फट् २, घे घे रम्ल्व्यूँ ज्वालामालिनी -हीँ क्लीँ ब्लूँ द्राँ द्रीँ ज्वल २ र ७, रां २, प्रज्वल २, घग २, धूँ २, धूमांधकारिणी ज्वल २, ज्वलित शिखे, प्रलय धग धगित वदन, देव ग्रहान् दह २, नाग ग्रहान् दह २, यक्ष ग्रहान् दह २, गंधर्व ग्रहान् दह २, ब्रह्म राक्षस ग्रहान् दह २, सर्व भूत ग्रहान् दह २, व्यंतर ग्रहान् दह २, सर्व दुष्ट ग्रहान् दह २, शतकोटी देवतान् दह २, सहस्त्र कोटी ग्रहान् दह २, सहस्त्रकोटी पिशाच राजान् दह २, घे घे स्फोटय २, मारय २, दहनाक्षि पलय धग २, धग धगितमुखि, ॐ ज्वालामालिनी -हाँ -हीँ -हूँ -हौँ -हः सर्व दुष्ट ग्रह हृदयं हूं दह दह, पच २, छिन्धि २, भिन्धि २, हः २, हे हे, हूं फट् २, घे २, ॐ भम्ल्व्यूँ ज्वालामालिनी -हीँ क्लीं ब्लूँ द्राँ द्रीँ भ्राँ भ्रीँ भ्रूँ भ्रौँ भ्रः हाः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्व दुष्ट ग्रहान् ताडय २, हूँ फट् २, घे २, ॐ मम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं म्रां म्रीं म्रूँ म्रौं म्रः हाः सर्व दुष्ट ग्रहान् वज्रमय सूच्या अक्षिणी स्फोटय २, अदर्शय २ हूँ फट् २ घे २, ॐ यम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं हाँ आँ क्रों क्षीं य्रां य्रीं य्रूँ य्रौं य्रः हाः सर्वदुष्ट ग्रहान् प्रेषय २, घे २, हूँ जः जः जः, ॐ घम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं घ्रां घ्रीं घ्रूँ घ्रौं घ्रः हाः घँ घँ खँ खँ खड्गै रावण सद्विद्या घातय २, सच्चन्द्रहास शस्त्रेण छेदय २, भेदय २, जठरं भेदय २, झं झे खं २, हं हं, हूं फट् २, घे २, झम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं झ्रां झ्रीं झ्रूँ झ्रैं झ्रः हाः सर्व दुष्ट ग्रहान् वज्र पाशेन बंधय २ मुष्टि बंधेन बंधय २, हूँ फट् २, घे घे, खम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं ख्रां ख्रीं ख्रूँ ख्रौं ख्रः हाः सर्व दुष्ट ग्रहान् अंगभंग कुरु कुरु, ग्रीवां भंजय २, हूँ फट् २, घे घे, ॐ छम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं छ्रां छ्रीं छ्रूँ छ्रौं छ्रः हाः सर्व दुष्ट ग्रहान् शस्त्राणि छेदय २, हूं फट् घे घे ॐ ठम्ल्व्यूँ ज्वालामालिनी ह्रीं क्लीं ब्लूँ द्रां द्रीं ठ्रां ठ्रीं ठ्रुँ ठ्रौं ठ्रः हाः सर्व दुष्ट ग्रहान् विद्युत् पाषाण अस्त्रेण ताडय २, भूम्यां पातय २, फट् २, घे २, ॐ बम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं ब्रां ब्रीं ब्रूँ ब्रौं ब्रः हाः सर्व ग्रहान् समुद्रे मज्जय २, हूँ फट् २, घे २, ॐ डम्ल्व्यूँ ज्वालामालिनी -ह्रीं क्लीं ब्लूँ द्रां द्रीं ड्रां ड्रीं ड्रूँ ड्रौं ड्रः हाः सर्वडाकिनी मर्दय २, हूं फट् २, घे घे, झ्रौं झ्रः सर्व शाकिनी मर्दय २ हूँ फट् घे घे सर्व योगिनी तर्जय २ कुरु २ सर्व शत्रून् ग्रासय ग्रासय, खं ६, खादय २, सं तं वं मं हां झं सर्व ग्रहान् उत्थापय २, नट २, नृत्य २, स्वाहा,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

य य सर्व दैत्यान् ग्रस २, विध्वंसय २, दह २, पच्च २, पाचय २, धर २, धम २, घुरु २, पुरु २, फुरु २, सर्वोपद्रव महाभयं स्तंभय २, झं २, हं ह, दर २, पर २, खर २, खड्ग शस्त्रेण सद्विद्यया घातय घातय, पातय २, चंद्रहास शस्त्रेण छेदय छेदय, भेदय २, झं २, हं २, खं २, घं २, दं २, फट् २, घे २, हां २, आं क्रौं क्ष्वीं क्षौं -ह्रीं क्लीं ब्लूँ द्राँ द्रीं क्रौं क्षीं ४ ज्वालामालिन्या ज्ञापयति स्वाहा ।

• • •

## ज्वालामालिनीमन्त्र स्तोत्र

ॐ नमो भगवते श्रीचन्द्रप्रभजिनेन्द्राय शशाङ्कशङ्खगोक्षीरहार-धवलगात्राय घातिकर्मनिर्मूलोच्छेदनकराय जातिजरामरणविनाशनाय त्रैलोक्यवशङ्कराय सर्वसत्वहितङ्कराय सुरासुरेन्द्रमुकुटकोटिघृष्टपादपीठाय संसारकान्तारोन्मूलनाय अचिन्त्यबलपराक्रमाय अप्रतिहतचक्राय त्रैलोक्यनाथाय देवाधिदेवाय धर्मचक्राधीश्वराय सर्वविद्यापरमेश्वराय कुविद्यानिधनाय,

तत्पादपङ्कजाश्रमनिषेविणि ! देवि ! शासनदेवते ! त्रिभुवन-सङ्क्षोभिणि ! त्रैलोक्याशिवापहारकारिणि ! स्थावरजङ्गमविषमविष-संहारकारिणि ! सर्वाभिचारकर्माभ्यवहारिणि ! परविद्याच्छेदिनि ! परमन्त्रप्रणाशिनि ! अष्टमहानागकुलोच्चाटनि ! कालदुष्टमृतकोत्था-पिनि ! सर्वविघ्नविनाशिनि ! सर्वरोगप्रमोचनि ! ब्रह्मविष्णुरुद्रेन्द्र-चन्द्रादित्यग्रहनक्षत्रोत्पातमरणभयपीडासंमर्दिनि ! त्रैलोक्यमहिते !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव्यलोकहितङ्करि ! विश्वलोकवशङ्करि ! अत्र महाभैरवरूपधारिणि ! महाभीमे ! भीमरूपधारिणि ! महारौद्रि ! रौद्ररूपधारिणि ! प्रसिद्ध-सिद्धविद्याधरयक्षराक्षसगरुडगन्धर्वकिन्नरकिंपुरुषदैत्योरगरुन्द्रेन्द्रपूजिते ! ज्वालामालाकरालितदिगन्तराले ! महामहिषवाहने ! खेटककृपाण-त्रिशूलहस्ते ! शक्तिचक्रपाशशरासनविशिखपविराजमाने ! षोडशा-र्द्धभुजे ! एहि एहि ह्मल्व्यूं ज्वालामालिनि ! ह्रीं क्लीं ब्लूँ फट् द्राँ द्रीं ह्राँ ह्रीं हूँ हैँ हः ह्रीं देवान् आकर्षय आकर्षय, सर्वदुष्टग्रहान् आकर्षय आकर्षय, नागग्रहान् आकर्षय आकर्षय, यक्षग्रहान् आकर्षय आकर्षय, राक्षसग्रहान् आकर्षय आकर्षय, गान्धर्वग्रहान् आकर्षय आकर्षय, गान्धार्यग्रहान् आकर्षय आकर्षय, ब्रह्मग्रहान् आकर्षय आकर्षय, भूतग्रहान् आकर्षय आकर्षय, सर्वदुष्टान् आकर्षय आकर्षय, चोरचिन्ताग्रहान् आकर्षय आकर्षय, कटकट कम्पावय कम्पावय, शीर्षं चालय चालय, बाहुं चालय चालय, गात्रं चालय चालय, पादं चालाय चालय, सर्वाङ्गं चालय चालय, लोलय लोलय, धूनय धूनय, कम्पय कम्पय, शीघ्रमवतारं गृण्ह गृण्ह, प्राहय ग्राह्य, अचेलय अचेलय आवेशय आवेशय हम्ल्व्यूं ज्वालामालिनि ! ह्रीं क्लीं ब्लूँ द्राँ द्रीं ज्वल ज्वल र र र र र र र रां प्रज्वल, प्रज्वल प्रज्वल प्रज्वल, धगधगधूप्रान्ध-कारिणि ! ज्वल ज्वल, ज्वलितशिखे ! देवग्रहान् दह दह, गन्धर्वग्रहान् दह दह, यक्षग्रहान् दह दह, भूतग्रहान् दह दह, ब्रह्मराक्षसग्रहान् दह दह, व्यन्तरग्रहान् दह दह, नागग्रहान् दह दह, सर्वदुष्टग्रहान् दह दह, शतकोटिदैवतान् दह दह, सहस्रकोटिपिशाचराजान् दह दह, घे घे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

